Ac 4'20
7-12-55
P
2515
UNIVERSITY

शारदा पत्र-पर्यायः

मालव–गौरवे
धारा-यशो-धाराः

4+20
360

॥ श्रीशारदा ॥



रथसप्तमी १८७३

ಪುಸ್ತಕದ ಸಂಖ್ಯೆ P-2515

दिगंबर महादेव कुलकर्णी बी. ए.
संस्कृतसाहित्यसुधाकरः, विद्याविनोदः ।
शिक्षक, न्यू इंग्लिश स्कूल, सातारा.

पुस्तकमूल्यं ☞ १६ आणकाः

निश्चीयते गवां मूल्यं शोनिकैर्मांसभार-तः ।
देवत्वात् दुग्धवैपुल्यात्प्रजादानाच्च धार्मिकैः ॥

शारदा-पत्र-पर्यायः

मालव-गौरवे

धारा-यशो-धाराः

॥ श्रीशारदा ॥



रथसप्तमी १८७३

दिगंबर महादेव कुलकर्णी बी. ए.
संस्कृतसाहित्यसुधाकरः, विद्याविनोदः ।
शिक्षक, न्यू इंग्लिश स्कूल, सातारा.

Ac 4120

T 360

इयं पुस्तिका सातारानगरे चैतन्याख्य मुद्रणालये श्री. ग. वा. गोडसे इत्याख्यैः मुद्रकैः मुद्रिता ।

श्री. दिगंबर महादेव कुलकर्णी इत्याख्यैः ग्रंथकर्तृभिरेव २१८ मंगळवार-वीथ्यां सातारानगरे प्रकाशं च नीता ।

अर्पण-पात्रिका

श्रीमच्छत्रपति महाराज्ञी सुमित्राराजे भोसले
सातारा

श्रीमच्छत्रपतिप्रतापजननी ख्याता सुमित्रा स्वयं
विद्वत्पोषकभोजराजसदृशो धारापतेः सोदरी ।
हंसी स्नानरता यथैव यमुना-मन्दाकिनी-धारया
भाग्यश्रीर्नृपभोजशाहुकुलयोस्तुष्येद्यशोधारया ॥१॥

श्रीमन्महाराज आनंदराव उदाजीराव पवार, धार

आलस्यं रसहीनता कृपणता धाराधिपे दुर्लभा
सत्कार्ये प्रतिकूलता च सचिवे तद्वन्न संभाव्यते ।
ग्रन्थोऽयं यदि राजहस्तकमले गच्छेत्क्षणं दैवतः
लोकस्येक्षणगोचरा ननु भवेत् भोजस्य लीला पुनः ॥२

दुग्धसिन्धूद्धृतौ कमला-कलानिधी इव विराजमानौ धाराधीशकुलसम्भूतावेतौ सहोदररत्नविशेषौ वर्जयित्वा को वाऽन्यो धारा-यशो-धाराभिराराधनीयो भवेत् ? अतः एतयोरेव करकमले सादरं समर्पितं एतत्काव्यं चिरं भृंगायताम् ।

—दि. म. कुलकर्णी

मुक्ताः केलिविसूत्रहारगलिताः संमार्जनीभिर्हृताः
प्रातः प्रांगणसीम्निमंथरचलद्बालांघ्रिलाक्षारुणाः ।
दूराद्दाडिमबीजशंकितधियः कर्षन्ति केलीशुका
यद् विद्वद्भवनेषु भोजनृपतेस्तत्याग लीलायितम् ॥

मालवगौरवे धारायशोधारा–नामकं इदं काव्यं ग्रन्थालयानां कृते पुण्यपत्तनविभागस्थैः शिक्षणाधिकारिभिः कृपया संमतम्।

This Sanskrit poem 'Malava Gourave Dharayashodhara' composed and published by Shri D. M. Kulkarni has been sanctioned for Libraries.

No. 5-66-B-S.
SM 15
Poona, 8 July 1952

Book Committee President
Edcl. Inspector P. D.

अयोध्यायां लब्धोदयस्य सर्वस्मिन्भरतखण्डे प्रकाशमानस्य च **संस्कृतपत्रस्य** सम्पादकमहोदयैरचिरात्प्रवर्तितायां **निःखिलभारतीयसंस्कृतकाव्यस्पर्धायां** काव्यमर्मज्ञैस्तैस्तैः परीक्षकसूरिभिः काव्यगतोत्कृष्टगुणमात्रलभ्यं **कमलाकान्तपारितोषिकं** (संवत् २००९) प्रदाप्य **मालवगौरवे धारायशोधाराः प्रथमपुरस्कारभाजनं** सन्तीति निर्णयो दत्त इति सानन्दं कृतज्ञतापूर्वकं च निवेदयामः। परिक्षकविदुषादृदृशेन परितोषेणास्य काव्यस्य संग्राह्यता परिशीलनार्हता प्रोत्साहनपात्रता च स्फुटीभवन्त्येव। तथापि २३७ तमश्लोकानुसारेण संप्राप्तेभ्यः सार्थाभिप्रायेभ्यः केचिदत्र निर्दिश्यन्ते।

केसरी–पुणें, श्रीशाहु, सातारा यांचे उत्कृष्ट अभिप्रायहि वाचनीय आहेत.

केचिद् अभिप्रायाः

श्री. **पांडुरंगशास्त्री गोस्वामी**, न्यायाचार्यः, सातारा यांचा अभिप्रायः—

.....अथेदानीं तदेव मालवगौरवाभिधायकं धारायशोधाराख्यं काव्यमधिकृत्य किंचिल्लिख्यते। काव्यमिदमाकृतितो नातिमहदपि गुणगरिम्णा गौरवास्पदमेव शुद्धबुद्धीनां विपश्चिदपश्चिमानामिति मे मतम्। भाषाशैली चास्यातीव सुगमा। प्रवेशपरीक्षां दित्सुभिश्छात्रैराधिकन्युत्पत्तिलाभार्थं, अवश्यमेतत्काव्यं पौनःपुन्येन पठनीयम्। मालवदेशसंबद्धाः श्रीविक्रमार्क–भर्तृहरि–मुंज–भोज–प्रभृतयः प्राचीनेतिहासप्रसिद्धा भूपाला महता कौशलेन सुमनोहरशब्दशलाकयात्र चित्रिता वर्तन्ते। बल्लालसेन–कविकालिदासादिवर्णनमपि वाचकानां मनांसि रंजयेदेव। पवार–शिंदे–होळकरादीनां मध्यकालीनानां भूपालानामपि चरितान्यतिसंक्षेपेण निक्षिप्यन्ते। राघोबादादापेशवामहोदयेन सह देव्यहल्यायाः संवादोऽपि सुमनोहरया शब्दशैल्या वर्णितो वर्तते, अतः पुस्तकमिदं सर्वैरपि वाचनीयं संवृत्तमित्यलं पल्लवितेनेति।

सातारा
१-११-५२

पाण्डुरंगशास्त्री गोस्वामी,
न्यायाचार्य.

डॉ **के. ना. वाटवे**, M. A. P. H. D. संस्कृत-प्राध्यापक, एस. पी. कॉलेज, पुणे यांचा अभिप्रायः—

सानन्दं परिशीलितं मया भवदीयं गीर्वाणवाग्विरचितं "मालव-

गौरवे धारा–यशोधाराः" संज्ञकं काव्यम् । सुमहद् वैरल्यमापन्नाय संस्कृत–काव्यविरचनायां, दुर्लभतमेषु च संस्कृतग्रंथप्रकाशनोन्मुखेषु प्रकाशकेषु, कृष्णपक्षे चान्द्रिकादर्शनेनेव भवतः काव्यदर्शनेन अतिमहान् सन्तोषः समजनि ।

काव्ये तत्र तत्र वर्तमानानि नदीपर्वतादिवर्णनानि तथा च राजप्रशंसापराणि स्थलानि सुरुचिराणि सन्ति । सर्वत्र च प्रस्फुरन्ती भवदीया सुलभा, हृद्या प्रसन्ना च वाणी संस्कृत–विमुखानपि संस्कृतप्रणयिनो विदध्यादिति मे निश्चितं मतम् ।

विशेषतः संस्कृत-विद्यार्थिभिः परिशीलनीयमिदं काव्यम् । सर्वैरपि आदृतं काव्यमिदं भवतो मनोरथान् सफलीकुर्यादित्याशास्य प्रणति-पुरःसरं विरमाम्यत्रैव इति शम् ।

भवदीयः

डॉ. के. ना. वाटवे

कॅप्टन डॉ. **रा. चिं. श्रीखंडे,** रसिकवर्य वाङ्मय-श्रीखंड, सुश्लोक गोविंद, सु. कुमार, सु. मेघ, सु. मानस इत्यादींचे कर्ते यांचा अभिप्रायः—

आज आपली सुरसश्लोकमयी काव्यकृति मला आपणांकडून मिळाली. ' धारा–यशो–धारा ' खरोखरच अमृतकाव्यधारा आहेत असें त्यांतील श्लोकांचा आस्वाद घेऊन वाटलें. आपलें समग्र पुस्तक

१॥–२ तासांत वाचून संपविलें. श्लोकवाणींत इतका प्रसाद भरला आहे कीं, कालिदास–भर्तृहरि–प्रभृतींची कविता वारंवार स्मरते ! आपला संस्कृत व्यासंग या श्लोकांत प्रतिश्लोकांत दिसून येतो. अनेक श्लोक कंठगत करावेत असे आहेत. अर्थान्तरन्यासहि चांगले आहेत उ० 'श्रेष्ठापवादः कुजनस्वभावः'. 'नवरत्नशब्दे 'मध्ये= नवनवीन हा अर्थ नवीन सौंदर्यदर्शक आहे (श्लोक ९२). श्लो. ९९ मधील लक्षवरील कोटी हृद्यविनोदी आहे. मृच्छकटिक, वासवदत्ता, मेघ-'दूत इ–इ. वरील आपले श्लोक वाचतां वाचतां अनेक हृदयंगम उल्लेख आठवून फार आल्हाद वाटतो. आपलें काव्य सुरस व निर्दोष आहे. फक्त 'रघुराजपुत्रः' ऐवजी 'रघुवंशनाथः' असा प्रयोग अधिक बरा वाटेल. राम म्हणजे रघुराजपुत्र म्हणणें तितकें सयुक्तिक वाटत नाहीं. (पद्य इ०) श्लो. ४३, ४४, ४८, ५१, ११९, १२९, १५६, १६७–१६९, २३४ इ--इ. असंख्य पद्यें फार मनोरम झालीं आहेत. पुस्तक वाचन आरंभलें ते शेवटपर्यंत गेल्या-वांचून थांबवलें नाहीं. आपल्या व्यासंगाचा हा परिपाक व विशुद्ध प्रातिभा पद्धत पाहून नितान्त आदर वाटला.....

कोल्हापूर

कॅप्टन डॉक्टर रा. चिं. श्रीखंडे

शुद्धिपत्रम्

कृपया अशुद्धानि शोधयित्वा काव्यं पठनीयम् ।

पृ.	श्लो.	अशुद्धं	शुद्धम्
९	३२	अनक	अनेक
६	४४	वेश्यापिजाता	वेश्यात्मजाऽऽसीच्च
९	७५	विनिष्ट	विनष्ट
१०	७९	विशेषः	विशेषैः
१५	१०५	गर्तित्रयं	र्गतित्रयं

एते समधिकाः श्लोकाश्च निर्दिष्टस्थले वाचयितव्याः

संस्थानानि विलीनानि भोजहर्षादयो गताः ।
मा शुचः **शारदे** ददुयुराधारं कवये बुधाः ॥

(शारदाचित्रस्य अधस्तात्)

उत्तरां दिशमुद्दिश्य शनैर्याति रवे रथः ।
कवेर्मनोरथाः किन्तु धावन्त्यद्य दिशो दश ॥

(प्रसिद्धितिथेरधस्तात्)

ज्ञाता न भासस्य निवासभूमिर्मन्ये तमावन्तिकमेव किन्तु ।
आवान्तिकानां हि रहस्यवृत्ते वैदेशिकानामनभिज्ञता स्यात् ॥४२ अ ॥

(उज्जयिनीमुद्दिश्य भासेन स्वप्नवासवदत्तं दरिद्रचारुदत्तं प्रतिज्ञायौगंधरायणं चेति नाटकत्रयं लिखितम् ।)

न्यासं न जाने मुषितः स वेति न्यासापहाराय वदन्ति मिथ्या ।
श्रीचारुदत्तस्त्वनृतं बभाषे प्रत्यर्पणार्थं परभूषणानाम् ॥४३ अ ॥

गीतं यतेर्भागवते प्रसिद्धं भिक्षुर्जगावुज्जयिनीनिवासी
कायेन वाचा मनसाऽप्यहिंसां स्ववर्तनेनोपदिशञ्जनानाम् ७० अ
भागवते एकादशस्कन्धेऽध्यायः २३

द्यावापृथिव्योः प्रथिता पृथक्ता शाकुन्तलेनापहृतेति तोषात् ।
गेटे–रवीन्द्रौ वदतः कवीन्द्रौ प्रयोगशंकां त्यज कालिदास ॥१२८॥ अ

संगृह्य यत्नैर्विविधान् पदार्थान् काव्ये मयाऽस्मिन् निहिता यथेच्छम् ।
हर्म्यं कारिष्यन् स्थपतिः पटीयान् किं निर्मिमीते दृषदं मृदं वा ?॥
२१७ अ

Wouldst thou the earth and heaven itself in one
sweet name combine ?
I name thee, O Shakuntala, and all at once is said.
-Goete.

गेटे की समालोचना अनुसरण कर मै फिर भी यही कहता हूं कि शाकुन्तलाके आरम्भ के तरुण सौन्दर्यने मंगलमय परम परिणतिसे सफलता प्राप्त कर मर्त्य को स्वर्ग के साथ संमिलित करा दिया है।
–कवीन्द्र रवीन्द्रनाथ टागोर
(प्राचीन साहित्य)

(कल्पना-विरोधः)

निर्माय नूतनमुदाहरणानुरूपं
काव्यं मयात्र निहितं न परस्य किञ्चित् ।
किं सेव्यते सुमनसां मनसाऽपि गन्धः
कस्तूरिकाजननशक्तिभृता मृगेण ? ॥

रसगंगाधरे जगन्नाथः

ग्रहस्य पीडा भ्रमणात्मवृत्तिः कलंकदोषो मुहुरस्तयोगः ।
तिरस्क्रियाऽन्यैर्यदि चंद्रभान्वोर्नृणां कथा का बत पामराणाम् ? ॥

॥५९ अ ॥

ग्रामश्रेष्ठमधिष्ठिता फणिविषं हर्तुं समर्था दृशा
देवी **श्रीवटजा** प्रसार्य वटवच्छायां दया-शीतलाम् ।
तापांस्त्रीनपि संहरन्त्यनुदिनं माता प्रजावत्सला
ग्रामस्थां जनतां करोति सुखिनीं धान्यैर्धनैर्गोधनैः ॥ २१९ अ

(वटजादेव्या दर्शनेन विनौषधं सर्पविषबाधा विनश्यति ।)
(पाटखले उत्कृष्टधान्यानां उत्कृष्टवृषभाणां च समृद्धिः प्रसिद्धा ।)

प्रस्तावना

मम वक्तव्यस्य भूयिष्ठांशोऽस्मिन्नेव काव्ये स्थाने स्थाने प्रकाशितः। अतस्तस्य पुनरुक्तिं परिहृत्य अवशिष्टं आशयं निवेदये। १९२५ खिस्ताब्देऽहं मुंबापुर्यां एल्फिन्स्टनाख्य राजकीयपाठशालायां संस्कृताध्यापक आसम्। तदा छात्राणां संस्कृताध्ययने रुचिर्जायतामिति संस्कृतशारदाख्यं पाक्षिकं पत्रं प्रवर्तियितुं मतिमकरवम् छात्रैरपि सर्वविधं साहाय्यं प्रतिश्रुतम्। किन्तु मे दैवदुर्विपाकात् शारदायाः प्रथमांकस्य प्रकाशनात्प्रागेव व्ययसंकोचार्थं (For reduction) राजकीयशासनेन मदीयं तत्रत्यं पदं विनष्टम्। यैश्छात्रैरार्थिकं साहाय्यं प्रतिश्रुतमासीत् तेषां पुनर्दर्शनयोगोऽपि नागतः। अपरं च प्रवेशपरीक्षायां तदा संस्कृत विषय ऐच्छिकः कृतः। शंखनादप्रियाणां फाल्गुनमासागम इव छात्राणां सा इष्टापत्तिरेवाभवत्। तेन भूयिष्ठैश्छात्रैः परीक्षार्थं संस्कृतस्याध्ययनस्थाने देशभाषाध्ययनं अंगीकृतम्। नखसाध्यकार्ये कुठारं क उपयुञ्जीत। अपि च तस्मिन्नेव काले मम पितृपादैरार्जितं वित्तं भूयिष्ठांशेन दायादैरपहृतम्। अंशतो रोगेण अंशतश्च धननाशदुःखेन ममं पितृपादा दिवंगताः। कुटुम्बपोषणस्य च सर्वो भारो ममशिरसि आपतितः। रत्नावल्या सूत्रधारेण यदुक्तं तदेव किञ्चित्परिवर्तितं तस्याः परिस्थितेः वर्णने समर्पकं भवेत्।

"मद्भाग्यापचयादिम समुदिताः सर्वेऽन्तरायाः समम्।"

परिणामतः शारदापत्रमस्तं गतम्।

तथापि निजमनोविनोदार्थमेव गीर्वाणवाणीचरणपरिचर्या मया न त्यक्ता ।

× × ×

अथैकदा १९४९ तमे खिस्ताब्दे श्रीमच्छत्रपतेः शाहुराजस्य द्विशततमं श्राद्धं नागरिकैः महता समारोहेण तस्य शीर्णावशिष्टे प्रासादे सप्ततारपुरे अनुष्ठितम् । तदा एकं प्रसंगोचितं काव्यं रचयित्वाहं सभायामपठम् (परिशिष्टं द्रष्टव्यम्) । तद् इतिहासकारेभ्यः श्री. गोविंद सखाराम सरदेसाई महाभागेभ्यो भृशमरोचत । अतः तद् अत्रत्य राज्ञ्यै तदानीं **धारा**वास्तव्यायै श्रीमच्छत्रपतिप्रतापसिंहमात्रे **सुमित्रा**देव्यै पत्रद्वारा मया प्रेषितम् । तस्मिन् प्रसंगे धारायशोधारा-काव्यस्य अयं रमणीयो विषयो मे स्फूर्तिगोचरतां गतः ।

धारायशोधारासु **धारा**वर्णनं प्राधान्येन भवितुमर्हति । किन्तु धाराधीशानां शौर्यस्य चातुर्यस्य औदार्यस्य च कथानां परिचयाभावात् स विस्तरो दुष्करोऽभवत् । ताः कथा अधिगन्तुं मया मुहुर्मुहुर्नानाविधाः प्रयत्नाः कृताः किन्तु न जाने **शनेः** प्रातिकूल्यात्सर्वेऽपि ते विफलतां गताः । तथापि विषयस्य सरसत्वात् वर्ण्यव्यक्तीनां च लोकप्रियत्वात् न्यूनतापूर्णमपि एतत्काव्यं रसिकादरस्य पात्रं भवेदिति विश्वस्य प्रकाशतां नयामि । तन्न्यूनं सज्जनैः कृपया सोढव्यं पूरणीयं वा ।

मया कानिचित् सुभाषितानि, नाट्यसंवादाः अनुवादाः प्रासंगिकानि पद्यानि च विरचितानि । " सर्वः कान्तमात्मीयं पश्यति "

इति न्यायेन तानि सर्वाण्यपि वाचनार्हाणि मन्ये । अनुकूलतायां प्राप्तायां यथावकाशं तानि प्रकाशयिष्ये । तेषामपि संस्कृताभिमानिभिः स्वीकारः कृपया कार्य इति प्रार्थये ।

अस्य काव्यस्य मिषेण सर्वेषां छात्राणां मित्राणां शारदापत्र-ग्राहकाणां इतरेषांच रासिकाग्रणीनां सेवां विधातुं मयाऽवसरः प्राप्त इत्यात्मानं धन्यं मन्ये ।

मालव—गौरवे

धारा—यशो—धाराः ।

मंगलाचरणम् ।

१ कविं कवीनामनुशासितारं श्रीशारदांबां वरदां कवीनाम् ।
नत्वाऽनुकुर्वे रसिकप्रियाणि स्वार्थानुरोधाद् विदुषां पदानि ॥१॥

मालवदेशः ।

अस्त्युत्तरस्यां दिशि नर्मदाया यो मालवाख्यो विततप्रदेशः ।
समृद्धिमुग्धो यमुपैति वस्तुं कैलासनाथो हिमशैलशृंगात् ॥२॥
" मान्धातुरोंकारपुरेऽमलेशो महांश्च-कालेश्वर उज्जयिन्थाम् "
प्रासादयुग्मे वसतः सुखेन विरक्तशंभोर्द्विगुणा सुखेच्छा ॥३॥

जलसमृद्धिः ।

नक्राकुला वेगवती गभीरा " श्रीनर्मदा " दक्षिणतः स्रवन्ती ।
संरक्षणार्थे किल मालवानां खाता विधात्रा परिखेव भाति ॥४॥
लिंगानि शंभोरमितानि यत्र तथा प्रतीकानि गणाधिपस्य ।
२ लुठन्ति नित्यं सलिलेऽथवाऽस्याःसंसर्गलेशाद् दृशदोऽपि देवाः ॥५॥
३ " चर्मण्वतीयं " जलपावनेति वाक्ये न शंक्यो वदतोविघातः ।
चर्माणि किंवा रुधिरं न लभ्यं तस्या इदानीं स्फटिकाच्छतोये ॥६॥

---

१ स्वकीयसंदर्भानुरोधेन अर्थं परिवर्त्य शब्दान् उपयुज्य च मार्गं अनुसरामि । २ नर्मदायां शिवस्य लिंगानि गणेशस्य प्रतीकानि च उपलभ्यन्ते अथवा तत्रत्याः पाषाणाः तत्संसर्गात् देवत्वं यान्ति । ३ चम्बलानामनदी

* यागेषु " रन्तेः " पशवो हता ये चर्माणि तेषां रुधिरापगायाम् ।
पुराऽप्लवन्तेत्यभिधानमेतत् तस्यै प्रदत्तं कविभिः पुराणैः ७

१ वेत्राणि सर्वत्र नदीतटेषु ख्याता परं वेत्रवतीयमेका ।
मन्येऽत्र वृत्तः किल चक्रपाणिः पार्थार्थसिध्द्यै करतोत्रवेत्रः ८

२ सिन्ध्वन्तराद्यद्यभपि मन्दतोया सिन्धुः प्रशस्या यमुनासखीत्वात् ।
सतां हि संगो नयति प्रकर्षं स्पर्शेन लोहं क्रियते सुवर्णम् ९

क्षिप्रप्रवाहात् सरिता ऽत्र " सिप्रा " क्षिप्रेति लोके लभते च संज्ञाम्
श्रीकृष्णपादाब्जरजःप्रसंगाद्भाग्यं तदीयं किमु वर्णनीयम् १०

एकाग्रचित्ताः सुचिरादधीत्य सुदाम–संकर्षण–बालकृष्णाः
श्रान्ता दिनान्ते पुलिने यदीये श्रमापनोदं नियमेन चक्रुः ११

३ नद्यः पवित्राः सकलाश्च लोके तथापि तासां बहु तारतम्यम्
विशिष्टमांगल्यगुणादमूषां संकीर्तनं मंगलगीतिकायाम् १२

विंन्ध्याद्रिः ।

आसां बहूनां जनकश्च विन्ध्यः सहस्रबाहुः प्रतिकार्तवीर्यः
सहस्रपादो भगवान् दिनेशः सहस्रशीर्षो धरणीधरश्च १३

---

* चर्मण्वतीतीरस्थधवलपुरराजः रन्तिदेवः । नामैकदेशे नामग्रहणम्

१ प्रपन्नपारिजाताय 'तोत्रवेत्रैकपाणये' । ज्ञानमुद्राय कृष्णाय गोविन्दाय तुभ्यंनमः २ वेत्रवती = बेटवानदी. सिन्धुनाम्नी यमुनासंगता नदी.

३ गंगासिन्धुसरस्वती च यमुना गोदावरी नर्मदा
कावेरी शरयू महेंद्रतनया चर्मण्वती वेधिका
सिप्रा वेत्रवती महासुरनदी ख्याता च या गंडकी
पूर्णापूर्णजलैः समुद्रसहिताः कुर्वन्तु वां मंगलम्

इति विवाहमंगलाष्टके षण्णां नदीनां नामोल्लेखो विद्यते

१ तेजः परेषां प्रसृतं प्रभावि तेजोविशिष्टः सहते न जातु
नगाधिराजोन्नतिरद्वितीया विन्ध्यस्य जाता हृदि शल्यतुल्या १४

कृत्वा प्रतिज्ञां भवितुं यशस्वी स्पर्धां समारब्ध हिमालयेन
शिरोभिरुच्चैर्गगनं विभिद्य विन्ध्यो हिमाद्रिं द्रुतमत्यशेत १५

२ आदित्यचन्द्रावनिलश्च रुद्धा अहश्च रात्रिश्च हतक्रमा ऽ भूत्
३ दिक्कालबोधो विहतो जनानामनर्थजातं जगति प्रवृत्तम् १६

संकल्पपूर्वं यजनादि कृत्यं दिक्कालबोधस्तु रवीन्द्वधीनः
४ दिक्कालमोहान्न भवन्ति यज्ञा वृष्टिर्न सस्यं न सुखं न तस्मात् १७

देवा मनुष्या व्यथिताः सचिन्ता रात्रिंदिवं भूरि विचार्य कार्यम्
अन्यानुपायानपसार्य सर्वे प्रणम्य विंध्यस्य गुरुं ह्यवोचन् १८

उच्छृंखलो ऽ यं तव पूर्वशिष्यः पीडामसह्यां जगते ददाति
प्रक्षुब्धसिन्धोरपि गर्वहारिन् कस्त्वां विना तं प्रभवेन्नियन्तुम् १९

विन्ध्याद्रिरभ्रंकषमस्तकोऽपि गुरोरगस्त्यस्य पदे नमाम
दिवं प्रयातेऽपि गुरौ शयान आस्ते स आदेष्टुमनम्रशिष्यान् २०

---

१ न तेजस्तेजस्वी प्रसृतमपरेषां विषहते । स तस्य स्वो भावः प्रकृति नियतत्वादकृतकः । मयूखैरश्रान्तं यदितपति देवो दिनकरः । किमाग्नेयो बाबा निकृत इव तेजांसि वमति ॥ २ आदित्यचन्द्रावनिलोऽनलश्च द्यौर्भूमिरापो हृदय यमश्च । अहश्च रात्रिश्च उभे च सध्ये धर्मोऽपि जानाति नरस्य वृत्तम् । ३ यस्यां दिशि सूर्याचन्द्रमसौ उदयेते सा पूर्वा । यस्यामस्तमितः सा पश्चिमा । पूर्वाभिमुखस्य दक्षिणतः दक्षिणा वामतः उत्तरा एवं दिग्बोधो भवति । ४ यज्ञाद्भवति पर्जन्यः पर्जन्यादन्नसंभवः । गीता । धर्मकृत्यारंभे अमुकस्थः सूर्यः, अमुकस्थः चन्द्र इति निर्देशो भवति ।

" जित्वा विपक्षं गुरुरेव मोदो नत्वा गुरुं किन्तु ततो गरीयान् "
इत्थं विचिन्त्योन्नतमानसोऽसौ स्पर्धा-प्रयत्नाद्विरराम विन्ध्यः २१

यदा व्रजेन्निष्क्रियतां विपक्ष उत्थानशीलः कुरुते प्रयत्नान्
निधाय चित्ते व्यवहार-तन्त्रं हिमाचलः किं यततेऽधुनाऽयम् २२

शशे शयाने सति मन्थरोऽपि कूर्मो गतिं स्वां द्विगुणां चकार
विन्ध्ये शयाने हिमवानसाध्नोत्तथोन्नतिं हस्तशताधिकां स्वाम् २३

अलं हिमाद्रे तव वर्धनेन स्पर्धानिवृत्तो गुरुभक्तविन्ध्यः
धराधरव्याप्तवसुंधरायां प्राथम्यमुच्चैःशिरसस्तवैव २४

अनर्थकोटयः प्रभवन्ति तत्र तवाचलस्योच्छ्रयणप्रयत्नैः
जीवा न सोढुं प्रभवन्ति दुःखं यज्जायते त्वच्चलवृत्तियोगात् २५

तुंगोऽपि विंध्यो विनयावनम्रो गुरोः पुरस्ताद् बटुवद्बभासे
सुपुत्रशिष्यौ विनयावलंबाद् गुरोर्गुरुत्वं परिवर्धयेते २६

" मोत्तिष्ठ यावत्पुनरैमि वत्स " शशास विन्ध्यं चुलुकीकृताब्धिः
आज्ञा प्रमाणं सततं गुरोर्मे प्रोवाच विन्ध्योपि नियत्य चित्तम् २७

अंगुष्ठदानेन वशीचकार द्रोणस्य चित्तं शबरैकलव्यः
तथास्तिकार्थेऽप्यरितक्षकस्य ररक्ष जीवं जनमेजयोऽपि २८

गुरोःसमक्षं बहुधा भयेन शिष्या नियोगान् परिपालयन्ति
तस्मिन्प्रयातेऽपि दिवं पुनर्ये आज्ञापराः सन्ति त एव धन्याः २९

चिच्छेद रामो जननीशिरोऽपि तत्याज राज्यं रघुराजसूनुः
ददौ पुरुयौवनमात्मपित्रे आज्ञा गुरूणां ह्यविचारणीया ३०

अहिफेनः (अफू)

निद्राप्रदा शोथहरा गुणाढ्या रुग्यातनाहर्त्र्यतिसारशत्रुः
अत्रैव रोहत्यहिफेनवल्ली शस्यान्तरश्यामलमालवेषु ३१

अनेकवर्णानि सुमानि तस्याः शस्येषु राजन्ति मनोहराणि
सोष्णीषशीर्षाणि महोत्सवेषु सदस्यवर्गस्य यथा सभायाम् ३२

आसक्तिरस्यां व्यसनं सुघोरमकालमृत्योरपि यन्निदानम्
स सर्वथा योजयितुः प्रमादो हिताहितं सेवनरीत्यधीनम् ३३

१ सुधाऽपि शुद्धा सुखदुःखहेतुः प्रसंगभेदादिति सिद्धपूर्वम्
दिवौकसामप्यमरत्वदाऽसौ राहोः शिरः किं न पृथक्चकार ३४

उज्जयिनी

क्षेत्रं पवित्रं नगरं समृद्धं सिप्रातटिन्या निकटे निविष्टम्
यस्मिन् महाकाललललाटचन्द्रात् तमिस्रपक्षेऽपि निशाः प्रकाशाः ३५

अवत्यवन्ती भवसिन्धुमग्नाञ्जयत्यरीनुज्जयिनी युयुत्सून्
द्वेधाऽप्यसावस्ति ययार्थनाम्नी महत्त्वमस्या मनसोऽप्यभूमिः ३६

सुवर्णशृंगेत्यमरावतीति पद्मावती पुष्पकरंडिनीति
तथा विशालेत्यभिधानमाला तस्या गुणान् किञ्चिदिव व्यनक्ति ३७

अग्नीन्दु सूर्यात्मकलोचनस्य ज्योतिःस्वरूपस्य महेश्वरस्य
ज्योतिर्मयद्वादशलिंगमध्यात् कालाभिधानं बहु राजतेऽत्र ३८

कैलासनाथस्य निकेतनं तत् प्रवासहेतुर्यतियात्रिकाणाम्
विलासभूमिर्विदुषां कवीनां भूवासमुक्तिर्जडचेतनानाम् ३९

२ अधीत्य यस्याँ स-कलाश्च विद्याः सर्वज्ञतां प्राप यदूत्तमोऽपि
कामं कुशाग्रा यदुनाथबुद्धिः सांदीपनेः कौशलमप्यनल्पम् ४०

यद्वेधशालाभ्दुतशिक्षणेन विकासमायाति बुधस्य दृष्टिः
न केवलं भूतलमेव यस्या नभस्थतारा विषयीभवन्ति ४१

---

१ दिवौकोभ्यः स्वर्गे वसद्भ्योऽपि सुधया अमरत्वं दत्तम्
२ सांदीपनिः कृष्णगुरुः उज्जयिन्यां न्यवसत्

मृच्छकटिकम् ।

जयत्यसावुज्जयिनी च यस्यां श्रीचारुदत्तस्य गुणैरुदारैः
न केवलं सा प्रतिभा कवीनां वसन्तसेना गणिकाऽपि लुब्धा ४२

हरन्ति वेश्याः पुरुषस्य लोके चित्तं च वित्तं च बहुप्रयत्नैः
स्वयार्पितं किन्तु वसन्तसेने श्रीचारुदत्ताय धनं मनश्च ४३

कलत्रपुत्रान्वितचारुदत्तो मुमोह दृष्ट्वैव वसन्तसेनाम्
वेश्याऽपि जाता सुदरिद्रनिष्ठा गुणाः प्रधानं न वयो न वित्तम् ४४

दारिद्र्यपीडा मरणाधिकाऽस्तु खला यथेच्छं परिपीडयन्तु
सुखावकाशो गुणिनस्तथापि सारं परं शूद्रकनाटकस्य ४५

वासवदत्ताऽपहारः ।

श्रीवत्सराजोऽनुबभूव भावं समर्पितं वासवदत्तयैव
स्वयंवरे नास्त्यपहारदोषो गुणानुरागो गुणिनीस्वभावः ४६

कथं कदा मद्धरणं विधेयं कृष्णाय भैमी स्वयमादिदेश
संयोगिताऽऽदौ सदनात्प्रतस्थे तां पृथ्विराजोऽपजहार पश्चात् ४७

दुरात्मनां मत्सरिणां जगत्यां नित्यो विनोदो सुजनापवादः
सन्तः परीक्ष्यैव वचो वदन्ति मूढः परप्रत्ययनेयबुद्धिः ४८

प्रियः प्रियाया मनसेप्सितश्चेत् प्रलीयतेऽसावपहारदोषः
कस्तत्र हर्ताऽपहृतश्च को वा गुणागुणौ किं न तयोः समानौ ४९

जायां जयेद्यः पणपूरणेन स्वयंवरं तस्य विवाहमाहुः
मत्स्यस्य वेधे धनुषश्च भंगे स्वयंवरत्वं ननु चिन्तनीयम् ५०

कर्णोऽकरिष्यद्यदि मत्स्यवेधं रक्षोऽधिनाथो धनुषश्च भंगम्
किं द्रौपदी वा जनकात्मजा वा स्वयंवरायाः पदवीमयास्यत् ५१

श्रीविक्रमार्कः ।

तमो निरस्यत्युदयं प्रयाति पदं निधत्ते धरणीधरमूर्ध्नि
करोति हिंस्रप्रकृतींश्च लीनान् धाम्नां निधानं नृपविक्रमार्कः ५२

अनन्तकालौघगतेः प्रमाणमादित्यबिम्बोदयतो जगत्याम्
श्रीविक्रमार्कोदयतोऽपि तद्वत्संवत्सराणां गणना प्रसिद्धा ५३

शास्त्रोक्तकृत्ये कुरुते प्रवृत्तिं गानप्रवृत्तांस्तनुते द्विजातीन्
श्रीविक्रमादित्यपदे समस्ते नेष्टोपमा रूपकमेव किन्तु ५४

दिशां जयो यो रघुवंशकाव्य उदात्तवीराभ्दुतवाग्विलासः
रघोः कृतित्वेन भृशं चकास्ति श्रीविक्रमस्यैव पराक्रमोऽसौ ५५

श्रीविक्रमस्यैव कुमारलाभः कुमारकाव्यस्य निमित्तमासीत्
पुत्रे कुमारे जनकः पिनाकी. ग्रन्थस्य नाम्नाऽप्युभयोः प्रशस्तिः ५६

शनिमाहात्म्यम् ।

१ संशेरते ये मुनिदिव्यदृष्टिं प्रत्युत्तरं तैः कृपया प्रदेयं
अवीक्ष्य गूढं शनितैलयन्त्रं ज्ञातं कथं तैः शनितैलिकत्वम् ५७

वहेत्तुरंगो नभसा स्वसादिनं हारं गिलेच्चित्रगतोऽपि हंसः
भूपो भजेत्तैलिक–भृत्यभावं शनेर्विरोधात्प्रभवन्त्यनर्थाः ५८

मिथ्यापवादेन पतिव्रतायाः श्रीरामपत्न्याश्च वने विवासः
श्रीविक्रमस्यापि च देहदण्डः सर्वंकषैषा शनिरोषबाधा ५९

विहंगवेगेन तुरंगमेण स्वैरं चिरं योऽभ्रमदन्तरिक्षे
बभूव सोऽन्ते तिलयन्त्रयन्ता हा हन्त दैवस्य गतिर्विचित्रा ६०

---

१ शनि असे जातीचा तेली – शनिमाहात्म्य.
शनीचे तेजोवलय फक्त दुर्बिणीनें दिसते. ते ऋषींना धान्यासारखे वाटले.

अनंगरम्यो नृपतिर्निरागा अनंगता–दुःखमवाप शापात्
साहित्यसंगीतकलावतस्तु विपद्गतस्यापि सुखं वशेऽस्ति ६१
राज्याच्च्युतः खंडितपाणिपादो वृत्त्यर्थमंगीकृतभृत्यभावः
शनिं ययाचे परदुःखमुक्तिमौदार्यशाली किल विक्रमार्कः ६२
श्रीविक्रमार्कस्य दिवंगतस्य सहस्रयुग्मे शरदां व्यतीते
गातुं प्रवृत्तोऽस्मि तदीयकीर्तिं सिद्धं ततोऽस्या अजरामरत्वम् ५३

भर्तृहरिः ।

शृंगारवैराग्यसमाजनीतीर्भोगी विरागी नृपतिर्यतिश्च
सुभाषितानां शतकत्रयेण गातुं कविर्भर्तृहरिः समर्थः ६४
शृंगारभोगात्सुपृथग्विरागः कौटिल्यनीतेर्व्यवहारनीतिः
* सुरासुराः सिन्धुवपुर्यथैकं भिन्ना गुणा भर्तृहरिं श्रयन्ते ६५
१ धन्यो भवेयं यदि पार्श्वतो मे ते दाक्षिणात्याः कवयो भवेयुः
वांछामिमां भर्तृहरेः कथंचित्करोमि पूर्णां स्थलकालदूरः ६६

---

* इतः स्वपिति केशवः कुलमितस्तदीय द्विषा –
मितोऽपि शरणार्थिनां शिखरिणां गणाः शेरते ।
इतोपि वडवानलः सहसमस्तसंवर्तकै–
रहो विततंमूर्जितं भरसहं च सिन्धोर्वपुः ॥ भर्तृ. २ ७६

१ अग्रे गीतं सरसकवयः पार्श्वतो दाक्षिणात्याः
पृष्ठे लीलावलयरणितं चामरग्राहिणीनाम् ।
यद्यस्त्येवं कुरु भवरसास्वादने लंपटत्वं
नोचेच्चेतः प्रविश सहसा निर्विकल्पे समाधौ ॥ भर्तृ. ॥

भर्तृहरेर्वैराग्यशतकं, उज्जयिन्यां वर्तमाना गुम्फा, तत्र विराजमाना वैराग्यशालिनामविच्छिन्नपरम्परा च दाक्षिणात्यकव्यलाभस्य प्रमाणम् । अहं दक्षिणापथस्थः सातारानिवासी कविः भर्तृहरेर्मृत्योरनन्तरं चतुर्दशभिः वर्षशतकैस्तद्गुणान् कीर्तयामि । अतस्तस्य मनोरथसाफल्यम् ।

कवीनलब्ध्वा किल दाक्षिणात्यान् विरज्य राज्यादपि भोगपूर्णात् ।
श्रित्वा गुहां भर्तृहरिः समाधौ यत्राविकल्पे सहसा प्रविष्टः॥ ६७
क्षणं प्रशंसां क्षणमप्रशंसां यत्नस्य दैवस्य तदीयकाव्ये ।
पठन्प्रवृत्तेश्च तथा निवृत्ते र्जगन्न जाने ह्यमृतं विषं वा ॥ ¶ ६८
क्षम्यो भवेद्भर्तृहरेर्मतानां निराग्रहो वा परिवर्तनं वा ।
रूढा चिराद्राज्यधुरंधराणां कालानुरोधाद्वचसां प्रवृत्तिः॥ ६९
संसारसौख्यं बहुदोषलिप्तं वैराग्यसौख्यं स्पृहणीयमेकम् ।
दशा नराणां नटभूमिकाश्च बोधामृतं भर्तृहरेः कवित्वे ॥ ७०

उज्जयिन्या वैशिष्ट्यम्

भुक्तिश्च मुक्तिः परमेशभक्ति र्विद्या कला दिव्यकवित्वशक्तिः ।
पराक्रमः क्षान्तिरुदारता च क्रीडन्ति मूर्ताः सममेव यस्याम् ॥ ७१
तप्तं च यस्यां बहुविक्रमार्कै र्गीतं च यस्यां बहु कालिदासैः ।
दत्तं च यस्यां बहु चारुदत्तैर्न तुल्यमन्यत्पुरमुज्जयिन्याः॥ ७२
शिष्टं च यस्यां बहु शिष्यवर्गैर्वित्तं च यस्यां बहु वैश्यवृन्दैः ।
इष्टानि पूर्तानि कृतानि यस्यामन्यत्कुतःस्यात्पुरमुज्जयिन्याः ॥ ७३
परीक्षिताः सत्कवयश्च यस्यां निरीक्षिता नित्यनवोत्सवाश्च ।
संरक्षितास्ते शरणार्थिनो ये चक्रक्रमन्यायवशं गता सा ॥ ७४
सिप्रा-प्रपूरै र्धरणीप्रकम्पैः प्राकारयुक्ता सुदृढाऽप्यवन्ती ।
विश्लिष्ट-भूयिष्ठगृहा भवन्ती ग्रस्ता महाकालरुषेव भूता ॥ ७५

¶ प्रयत्नानां प्रवृत्तिमार्गस्य च प्रशंसां श्रुत्वा संसारिणो मोदन्ते प्रयत्नानां वैफल्यं संसारसुखस्य क्षणिकत्वं च दृष्ट्वा ते निराशा भवन्तीत्यर्थः ।

नूतन–राजधानी–धारा

जीर्णां विहायोज्जयिनीं पुराणीं स वीरसिंहः परमारवंश्यः ।
लुब्धान्तरंगो गुणगौरवेण चक्रे नवां मालवराजधानीम् ॥ ७६
विशालहर्म्ये सहसा विनष्टे कुटीरकल्पं सदनं नवीनम् ।
आढ्योऽपि वस्तुं कुरुते कथंचिदित्येव नित्योऽनुभवोऽस्मदीयः ॥ ७७
प्रवर्तितो दीप इव प्रदीपाद् धारोज्जयिन्या बिभिदे न जातु ।
न्यूनाधिकत्वं वयसा तयोःस्याद्दीप्त्या तु बिम्बप्रतिबिम्बभावः ७८
वस्त्रेऽथवा तन्तुगुणाः समस्ता वसन्ति केचिच्च परे विशिष्टाः ।
तथोज्जयिन्या गुणसम्पदोऽपि श्रयन्ति धारामपरैर्विशेषैः § ॥ ७९
श्रुत्वा बुधानां गुणदोषचर्चां न्यूनाधिकादीन् परिवर्ज्य दोषान् ।
कृता विधात्रा रसिकस्य तृप्त्यै धारोज्जयिन्या नवसंस्कृतिः किम्॥† ८०
धारानगर्याः किल कीर्तिधारा वहन्त्यसंख्या विमला धरायाम् ।
भोजेन सार्धं रघुवंशकर्ता यस्यां विरेजे कविकालिदासः ॥ ८१

मुंजराजः

धारापुरेऽद्यापि जलाशयोऽस्ति मुंजप्रभोः सागरनामधेयः ।
नामाकृतिभ्यां सदृशः स सिन्धोर्माधुर्यतः किन्तु सुधातिशायी* ॥ ८२

---

§ धारा उज्जयिन्या अपेक्षया शोभया वैभवेन च न हीना वर्तते। सूत्रापेक्षया वस्त्रे लज्जारक्षकत्वं, शोभा-समृद्धि–जाति–वृत्ति-सूचकत्व इत्यादयो गुणा अधिकाः ।

† ग्रन्थस्य नवसंस्करणे पूर्वदोषा निरस्यन्ते गुणवृद्धिश्च क्रियते तद्वत् ।

*मुंजसागरनाम्ना तस्य क्षारत्वं न शंकनीयं किन्तु विशालत्वं बोध्यम् ।

कविः प्रतापी गुणपक्षपाती परोपकारी नृपमुंज आसीत् ।
भ्रातृव्यहिंसागुरुपातकात्तु सर्वे गुणास्तस्य वृथा बभूवुः ॥८३
एको हि दोषो गुणसन्निपाते निमज्जतीत्युक्तिवशेन मुंजः ।
नालक्षयद् यद् बहुधा धरण्यामेकोऽपि दोषो गुणराशिनाशी॥
भूमेः प्रभुत्वं क्षणिकं नितान्तमासक्तिरस्यां विफला तवेति।
मुंजाय भोजेन निवेदितं यत् प्रतीयते तस्य यथार्थताऽद्य॥†
विद्युत्पताका स्तनितैः प्रचंडा नीरन्ध्रधारा निबिडा कराला ।
कादम्बिनी क्वापि लयं प्रयाति प्रभंजने किंचिदिव प्रवृत्ते ॥
सिद्धेऽपि सैन्ये विपुले सशस्त्रे पूर्णेऽपि कोशे धनधान्यवृद्ध्या।
स्थितेषु दुर्गेषु च दुर्गमेषु सामन्तचक्रं सहसा विलीनम्॥८७
उत्कर्षहेतोर्नवभारतस्य श्रीवल्लभेनायसमानसेन ।
भूवल्लभानामधिकारपाशादुन्मोचिता भारतभूरिदानीम् ॥

श्रीभोजराजः

जघान शत्रून् समरेषु शूरः सरस्वतीकण्ठमलंचकार[१] ।
विद्वत्सु दानानि ववर्ष नित्यं वीरः कविर्दातृवरश्च भोजः॥

---

† अद्य नाम संस्थानेषु विलीनेषु ।
मांधाता च महीपतिः कृतयुगालंकारभूतो गतः
सेतुर्येन महोदधौ विरचितः क्वासौ दशास्यान्तकः ?
अन्ये चापि युधिष्ठिरप्रभृतयो याता दिवं भूभृतो
नैकेनापि समं गता वसुमती मुंजत्वया यास्यति ॥ भोजप्रबन्धः

१ सरस्वतीकंठाभरणं नाम अलंकारविषयकः ग्रंथः भोजेन रचितः।

भोजराजगजदानवारिणा पुष्टतुष्टकविभृंगवृन्दतः ।
निर्गतः कलरवोऽधुनाऽप्यहो मानसं रमयते मनस्विनाम् ॥‡
भोजस्य राज्ञो यशसां सुरक्षां चक्रे यथाऽसौ कवि-
कालिदासः ।
मित्राणि पुत्रा गुरवः सगोत्रा मंत्रिप्रकांडाश्च तथा न चक्रुः॥
परःसहस्राः कमनीयकाव्या यस्यां सभायां कवयो व्यराजन् ।
तस्यां प्रयुक्ते नवरत्नशब्दे नवं नवीनं, न मितार्थवाचि॥§

विजयस्तंभः

गांगेयतैलंगण–भेदिराजौ जितौमयाऽत्रैव पराक्रमेण ।
जयस्य तस्य स्मृतिरक्षणाय करोम्युपायं स्थिरमाह भोजः†॥
अत्युन्नतो लोहमयो विशालः स्तम्भो निखातो जयसूचनार्थम् ।
स्वयं त्रिखंडोऽपि यशांस्यखंडं तनोति भोजस्य भुवस्त्रिखण्डे॥*

---

‡(भोजराजः एव गजराजः । दानोदकं एव मदस्रावः । कवयः एव भृंगाः । अधुना कविभृंगेषु दिवंगतेषु । काव्यनाटकादीनां कलरवः।)

§ अभिनवं गुणविशेषणं न संख्यावाचकं ।

†(तैलंगणराजेन गांगेयेन, भेदिराजेन च भोजराजः अभिद्रुतः । किन्तु भोजस्तयोः पराजयं चकार ।)

*(गुर्जराधिपो बहादुरशाहो मालवान् विजित्य भोजस्य विजयस्तम्भं स्वराजधानीं नेतुं प्रायतत । वहनसौकर्यार्थं सः तं खंडशोऽकरोत् । गुरुत्वादेकः भागः नद्यां नावा नीयमानो निमग्नः । द्वितीयो गिरेः उन्नतमार्गे दुर्वहत्वात्त्यक्तः । अवशिष्टः तृतीयः खण्डः धारोज्जयिन्योर्मध्ये वर्तते । सः भोजस्य यशश्च स्मारयति । कहां राजा भोज और कहां गंगा तेली इति आभाणके अयमेव कथाभागो लक्ष्यते ।

विक्रमसिंहासनकथा

गोपालबाला अपि यस्य पृष्ठे निर्णीतवन्तो जटिलान्विवादान् ।
अध्यास्त यद् विक्रमचक्रवर्ती सिंहासनं तन्निकटे बभूव ॥ ९५
श्रीविक्रमादित्यसमो धरायां न्यायप्रवीणो भविता न भूपः ।
न्यायप्रवृत्तेर्नृपतेरभावात् सिंहासनं तत्त्रिदिवं जगाम ॥ ९६

भोजप्रबन्धकर्ता बल्लालसेनः

बल्लालसेनेन रसालवाण्या भोजप्रबन्धे ग्रथिताः कथा स्ताः ।
दिवंगतानां कविभूपतीनां तैस्तैः प्रसंगै रमयन्त्यभिज्ञान् ॥ ९७
भोजस्य माघादि कवीश्वरणामौदार्यचातुर्यकथाप्रणेतुः ।
बल्लालसेनस्य गुरूपकाराश्चिराय जाता रसिकोत्तमांगे ॥ ९८
श्रुत्वा कवीनां कवितां कविभ्यः प्रत्यक्षरं लक्षमदत्त भोजः ।
तादृग्गुणो नास्ति मदीयकाव्ये प्रत्यक्षरं लक्षमहं त्वपेक्षे ॥§ ९९
काव्ये पुराणे च तथेतिहासे शूरैरुदारैः कविभिर्नृरत्नैः ।
धाराप्रदेशः खचितो विभाति यथान्तरिक्षं ग्रहतारकाभिः ॥† १००

---

§काव्यं श्रुत्वा प्रसन्नः भोजः श्लोके यावन्ति अक्षराणि आसन् तावान्ति रूपकाणां लक्षाणि कवये पारितोषकत्वेन ददौ । मदीय काव्यं तथा उत्कृष्टं नास्ति । तथापि सर्वेषु अक्षरेषु तद् रसिकानां लक्ष– अवधानं आकर्षेत् इति मे अपेक्षा ।

कवीश्वराः १ कवयः ईश्वराः च । २ कवित्वयुक्ता ईश्वराः ३ कवयः ईश्वरा इव कालिदाससदृशाः ।

† नृरत्नानि ग्रहतारका इव Galaxy of stars.

कालिदासः

§प्रफुल्लपद्मे सरसि प्रसन्ने स्नात्वा स्तवैः स्वैः स्फुरितैः प्रसन्नैः;
कालीं प्रसन्नामकरोदिहैव कालीप्रसादात्किल कालिदासः १०१

*कालीप्रसादाय हठादनेन कृष्टा स्वजिह्वेति वृथा प्रवादः
गंगोद्धृतेनेव कवीश्वरेण व्यापारिता स्वा रसनेति सत्यम् ॥ १०२

‡'गंगालहर्या' कृतकृत्ययाऽपि सन्तोष्यतेऽद्यापि समस्तलोकः ।
‡'कालीलहर्या' तु तिरोहितं हा कृत्वा कृतार्थं कविवर्यमेकम् ॥१०३

उद्धृत्य दग्धान्सगरस्य पुत्राञ्जागर्ति गंगा जगतो हिताय ।
†अन्तर्हिता हन्त सरस्वती तु दत्त्वा कवित्वं कवये प्रयागे ॥ १०४

---

§ धारायां कालीमन्दिरस्य समीपे विशालपद्मप्रचुरं सरो वर्तते ।

* अशिक्षित इति भार्यया त्रमानितः कालिदासः काल्याः पुरतः जिव्होन्मूलनेन स्वापमानशल्यं उद्धर्तुं प्रायतत किन्तु देवीप्रसादात् सः प्रतिभामलभतेति आख्यायिका वर्तते ।

‡ कालीलहरी- कालिदासकृतस्य कालीस्तोत्रस्य काल्पनिकं नाम । सा नोपलभ्यते । श्यामलादण्डकं नाम कालिदासकृतं स्तोत्रं काव्यमालायामुपलभ्यते (काव्यमाला प्रथम गुच्छ निर्णयसागर) डॉ हर्षे महाभागानां कृपयातन् मयाऽवलोकितम् । तत्कालिदासस्येव न भाति । श्यामलादण्डक कर्ता कालिदासः शाकुन्तलकर्तुः भिन्नः । कालिदासः आत्मनः स्तोत्रं कालिकादण्डक अभिदध्यात् न श्यामलादण्डकम् ।

† कालीलहरी नाम कालिदास-सरस्वती अन्तर्हिता । गंगायमुनयोः तृतीया नदी सरस्वती च प्रयागे लुप्ता ।

संजीव्य पत्नीं जयदेवसूरेर्हत्वा च पापं यवनीधवस्य ।
हृत्वा च जाड्यं कविवृन्दमौलेर्गतित्रयं धन्यतमं धरण्याम् १०५
मयूरकुष्ठस्य निवारणे वा श्रीवेंकटस्यान्ध्यनिवारणे वा
सूर्यस्य लक्ष्म्याश्च गुणः स्तवेन वाचां विना स्यात्कथमर्थसिद्धिः १०६
हे कालि भक्त्या तव केवलायास्तास्मिन्कवौ श्रीश्च सरस्वती च
न तत्र चित्रं मम भाति किञ्चित् त्वमेव ते सप्तशती प्रमाणम् १०७
भूपप्रसादं जनमान्यतां च हर्म्यनिवासं धनपुत्रवत्ताम्
साहित्यसृष्टिं यशसां समृद्धिं वृद्धा कुमारीव वरात्स लेभे १०८
अप्यस्ति कश्चित्तव वाग्विशेषो येनार्हसि त्वं भवितुं पतिर्मे
शंकामिमां यो हृदयात्प्रियायाः काव्यत्रयेणैव शमं निनाय १०९
एवं व्यरंसीद्रजनीति काव्ये स बिन्दुलोपेन पुपोष शोभाम्
इत्याख्यया स्यात्त्रिदिवेऽपि तुष्टः श्रीकालिदासो भवभूतियुक्तः ‡ ११०

महालक्ष्मी महाकाली सैव प्रोक्ता सरस्वती ।
ईश्वरी पुण्यपापानां सर्वलोकमहेश्वरी ॥ सप्तशती वै. रा.

अज्ञात्वान्निष्कासितः कालिदासः कालीप्रसादादनन्तरं पुनरपि पत्नीं प्राप्तस्तदा सा तमपृच्छत् "अस्ति कश्चिद् वाग्विशेषः ?" तदा कविः अस्त्युत्तरस्यामित्यादि कुमारसंभवं, कश्चित्कान्ताविरहगुरुणा इत्यादि मेघदूत वागर्थाविवसंपृक्तौ इत्यादि रघुवंशं च पठित्वा प्रश्नस्योत्तरं ददौ इति आख्यायिका ।

‡ किमपि किमपि मन्दं मन्दमासत्तियोगात् ।
अविरलितकपोलं जल्पतोरक्रमेण ।

(पृ. १६ द्रष्टव्यम्)

सुभाषितान्यस्य परःशतानि नृत्यन्ति नित्यं रसिकास्यरंगे ।
अनन्यसाध्या उपमास्तदीयाः साहित्यसिन्धौ शतशः प्लवन्ते ॥ १११
(रसिकानां मुखं एव रंगभूमिः तत्र)

सीतोर्वशीशौ निजदारवार्तां पप्रच्छतुस्तिर्यगचेतनांश्च ।
तां गापयामास कविःक्षितिध्रं श्लोकेन राज्ञेऽप्सरसावियोगे ॥ ११२

कालिदास–ज्ञानेश्वरौ

पपाठ वेदं महिषोऽपि सम्यग् ज्ञानेश्वराणां कृपया तथैव ।
अन्धस्य दृष्टिर्गमनं च भित्तेः सतां प्रभूताः किल सन्ति लीलाः॥§ ११३

(१५ पृष्ठतः) अशिथिलपरिरम्भव्यापृतैकंकदोष्णोः
अविदितगतयामा रात्रिरेवं व्यरंसीत् ॥ उत्तररामच०

इमं श्लोकं भवभूतिः कालिदासाग्रेऽपठत् । कालीदासोऽवदत् । चतुर्थचरणे एवं पदस्य अनुस्वारलोपेन अर्थः साधीयान् भवेत् । भवभूतिः कालिदासानन्तरं जातः । तयोः समागमो दुर्घटः । अतो मया उक्त त्रिदिवेऽपि = स्वर्गेपि ।

सीतायाः वियोगे रामः सीतावार्तां पशून् पक्षिणः गिरीन् नदीश्च अपृच्छत् । तथैव उर्वश्या नाम अप्सरसा वियोगे पुरूरवा अकरोत् । पुरूरवा अपृच्छत् ।

सर्वक्षितिभृतां नाथ दृष्टा सर्वांगसुन्दरी ।
रामा रम्ये वनोद्देशे मया विरहिता त्वया ? ॥

पर्वतश्रेष्ठः प्रतिध्वनिना तेनैव श्लोकेन प्रत्यवदत् ।
(विक्रमोर्वशीये चतुर्थांकः ।)

श्लेषेण अन्वयभेदेन च कविना एकेनैव श्लोकेन प्रश्नः कृतः उत्तरं च दत्तम् ।

§ तस्माद्गिरेः श्लोकेन प्रतिभाषणं न सामान्यः चमत्कारः ।

कर्णास्यवाग्वान् महिषः सचेताः कर्णास्यवाग्हीनगिरिस्त्वचेताः ।
छन्दः पठेतां यदि तौ कदाचिच्चमत्कृतिः किं द्विविधा समाना? $११४
योगी कवीशो भवतः समर्थौ कर्तुं ह्यकर्तुं किमपीह कामम् ।
महत्तरो रम्यतरश्च किन्तु योगप्रभावात् प्रतिभाविलासः ॥ ११५

कालिदासकृतयः

वैदग्ध्यवान् मत्सरजागरूकां योऽमोहयन्मालविकासपत्नीम् ।
कन्याप्रियं नैष्ठिककाश्यपं च शकुन्त-लावण्यपदे च बालम् ॥† ११६
षण्णामृतूनां युगपद्विशेषान् योऽदर्शयन्नन्दनतुल्यकाव्ये ।
योऽबोधयच्च श्रुतबोधतन्त्रे वृत्तानि नाना कवितावपूंषि ॥* ११७
रम्याणि दृश्यानि सुबोधपूर्वं प्रदर्शयन् पुष्पकतः करेण ।
आसेतुहैमाद्रि विहंगगत्या योऽभ्रामयद्भारतभूमिमस्मान्॥[१] ११८

$ महिषस्य कर्णौ मुखं अव्यक्ताऽपि वाचा मनश्च सन्ति । तस्य छन्दसो नाम वेदस्य पठनं सुकरम् । गिरिस्तु सर्वथा विकलः अचेताश्च । तस्य श्लोकपठनं दुष्करम् ।

† स्वपत्नीं वंचयित्वा मालविकां अग्निमित्रोऽपश्यत् । ब्रह्मचारी काश्यपः कन्यावियोगेन व्याकुलोऽभवत् । कुमारभरतेन शकुन्त-लावण्यसमासे मातुर्नाम श्रुतम् ।

* नन्दनवने ऋतुसंहारकाव्ये च सर्वेषां ऋतूनां युगपद्दर्शनं भवति । काव्यस्य रसः आत्मा वृत्तं शरीरं च । श्रुतबोधे वृत्तलक्षणानि सन्ति ।

१ रघुवंशे त्रयोदशसर्गे दक्षिणसागरादारभ्य अयोध्यां यावत् पुष्पकस्थो रामः तानि तानि दृश्यानि अवर्णयत् । मेघदूते च यक्षः जनस्थानादारभ्य कैलासं यावत् मेघाय स्थलानि अवर्णयत् ।

मुक्तिप्रदं दर्शनमात्रतोऽपि मुक्तेन्द्रनीलग्रथितस्रगाभम् ।
संमिश्रगंगायमुनाप्रवाहं योऽदर्शयच्चित्रकरस्य दृष्ट्या[२] ॥ ११९

कुमारसंभवे—मदनदाहः

प्रहृत्य पुष्पेण सुकोमलेन शिवापराधं मदनश्चकार ।
समाधिभंगात्क्षुभितो हरस्तु भस्मावशेषं मदनं चकार ॥ १२०
मन्तुःकियान् स्पृष्टवतः सुमेन दण्डःकियान् प्राणहरस्तदर्थे ।
सुसंगतं कृत्यमिदं परन्तु संहारवृत्तेर्विषमेक्षणस्य ॥ १२१
इत्थं कठोरं हृदयं शिवस्य दुद्राव शीघ्रं रतिरोदनेन ।
भूत्वा दयार्द्रो रतिसौख्यहेतुं कृत्वाऽप्यनंगं व्यतनोत्सजीवम् ॥ १२२

मेघदूतम्

महेन्द्रचापेन विचित्रमूर्तिं मत्वा च कृष्णं शिखिपत्रभूषम् ।
धूमाग्निवातैर्घटितं च मेघं योऽग्राहयद्यक्षवरस्य दौत्यम् ॥ १२३
प्रदोषपूजासमये हरस्य य उज्जयिन्यां घनगर्जनेन ।
आर्तिक्यगीतावसरे सतालं भेरीनिनादस्य चकार घोषम् ॥ १२४
दूता अनेके कविभिः प्रणीताः प्रमाणलेखा इव दर्शयन्ति ।
यत्कालिदासप्रतिभोत्थमेघदूतेन तुल्यो न भवेत् कदापि ॥ १२५
गीताः सुगीता विलसन्ति भूरि तथापि मुख्या भगवत्प्रणीता ।
अंशावताराः परमेश्वरस्य पूर्णावतारेण कथं समानाः ॥ १२६

---

२ गंगायमुनयोः सितासितजलेन मनोहरः संगमः विविधाभिः रम्याभिरुपमाभिः रघुवंशे वर्णितः ।

सदा कवीनां गणनाप्रसंगे कनिष्ठिकासंगि यदीयनाम ।
आचार्यकं यस्य कुले कवीनां सदैव मान्यं जयदेव आह ॥ १२७
दुष्यन्तभूपस्य शिशूत्सुकस्य उद्धार एकोऽप्यनुवादितोऽपि ।
शाकुन्तलस्थः शिखिनं यथाब्दश्चकार पाश्चात्यकविं प्रमत्तम् ॥ १२८

स्थलकालादि-विपर्यासः

प्राचां नृपाणामथवा कवीनां तमोनिलीनाः स्थलकालचेष्टाः ।
यत्रास्ति नैक्यं विदुषां मतानां न तत्र हास्याय मम प्रमादाः ॥ १२९
काक्षिगोलस्य यथाक्षियुग्मे निरीक्षणार्थं क्रमशो निवासः[१] ।
भूपानुवृत्त्या कविपुंगवस्य धारोज्जयिन्योरुभयत्र वासः ॥ १३०
नतोन्नतत्वं ग्रहतारकाणां दूरत्वयोगाद्गगने न भाति ।
कालप्रभावात् समतां गतानां परावरत्वं बहुधा परोक्षम्[२] ॥ १३१
समानि नामानि भवन्ति राज्ञां पितामहानां च वहन्ति पौत्राः ।
समाननाम्नां प्रचुरप्रचाराद् दिङ्मूढभावो भवति स्वभावात् ॥ १३२
श्रीविक्रमा भोजनृपा उदाराः श्रीकालिदासाः कविसार्वभौमाः ।
नैके बभूवुर्गुणनामतुल्या वसुन्धरेयं बहुरत्नपूर्णा ॥ १३३
सर्वज्ञनारायणमानसेऽपि अजामिलोच्चारितपुत्रनाम्ना ।
भ्रमोऽभवच्चेदभिधानसाम्यादज्ञस्य पुंसः किमु मादृशस्य ॥ १३४

---

१ काकस्य उभयोः नेत्रयोः एक एव चक्षुर्गोलः इति रामायणम्
२ Death the Leveller परावरत्वं = कालक्रमः

अजामिलो भक्तिपराङ्मुखोऽयमद्यैव पापी कथमाह्वयेन्माम् ।
नाशंकतैतद् भगवान् दयालुर्नारायणोऽसौ निजनामतुष्टः ॥ १३५
सरूपवेषौ यमजौ सुतौ स्वौ अलं विवेक्तुं जननीह मुग्धा ।
जगत्पिता श्रीहरिरात्मनाम्नि कथं प्रमत्तो हरिरेव वेत्ति ॥ १३६
गायन्ति भक्त्या प्रतिवासरं ये नाम्नां सहस्रं परिवर्ज्य तान् नॄन्[३] ।
पाप्मानमेनं हरिरुज्जहार गुणा अगम्याः परमेश्वरस्य ॥ १३७

इति प्राचीन-धाराः

अथ मध्यधाराः

यवनानामुपद्रवः

पीडां महाभूतकृतां निवार्य ते मालवा अभ्युदिताः स्वयत्नैः ।
दैत्यात्म-माहंमद-वात्यया तु तद्भाग्यचक्रं परिवृत्तिमाप्तम् ॥ १३८
दारापहारः सुरमूर्तिभंगो गवां वधो वैदिकधर्मिपीडा ।
निषिद्धमन्यैर्विहितं च येषां माहंमदास्ते व्यजयन्त देशे ॥ १३९

---

३ अजामिलो नाम भ्रष्टब्राह्मणः मरणसमये स्वतनूद्भवं नारायणं आह्वयत् । किन्तु भगवान्नारायणः तेन नामस्मरेण प्रीतः आगत्य तमुद्धृतवान् इतिभागवत-कथा.

१ महापूर-भूकम्पादयः २ राक्षसशील-यवना एव वात्या = वातस्य समूहः

प्लुषाण हर्म्याणि, बधान सज्जनान्, मुषाण रत्नानि, हरामलांगना:
इत्थं कृता स्वर्गसमाऽप्यवान्तिका म्लेच्छापचारैर्नरकस्य सोदरी ॥§ १४०
ऐश्वर्यहीनाऽपिगुणैरहीना साहित्यगीता रसिकाप्रिया च ।
दशोज्जयिन्या अधुना विभाति श्रीचारुदत्तस्य यथैव मूर्ति: ॥ १४१
श्रीसूर्यनारायणमन्दिरं यज्जग्रास केतुर्यवनच्छलेन ।
तत्पूर्ववैरप्रतियातनं स्याद् ग्रास: कुतो मंगलमन्दिरस्य ॥‡ १४२
दिल्लीश्वरो वा जगदीश्वरो वा भूकम्पपूराक्रमणाद्यनर्थान् ।
लिलेख भालेऽमलमालवानां यदाज्ञया तं प्रणमामि **कालम्** ॥ १४३

महाराष्ट्रीय- नृपा:

म्लेच्छार्दितां मालवभूमिमेतां पंके निमग्नामिव कामधेनुम् ।
श्रीशाहुवीरा उदधारयन्त ये **बाजिराजेन** पुरस्कृताश्च ॥ १४४
उदोजिराप्रोदुदयं महान्तं **राणोजिरारा**प्रोत्स्पृहणीयराज्यम् ।
दृष्टास्तयोर्भाविगुणांकुरा: ।किं मातापितृभ्यामभिधानदाने ॥१४५
पवारसंज्ञा **परमार**तुल्या **शिंदे**पदे **शुंग**पदानुकार: ।
तन्नामसाम्यं किल नाममात्रं साम्यं यथार्थं विभवे गुणे च ॥ १४६

---

§ During the reign of Jalaluddin Firozshah the destruction of this place (Ujjain) made a hell of paradise. —Gwallior Gazetter.

‡ अमृतप्राशनार्थं केतु: देवेषु प्रविष्ट: । सूर्येण चन्द्रेण च तच्छ-द्मनो रहस्यभेद: कृत: । अत: केतु: सूर्यं ग्रसति । किन्तु मंगलमन्दिरस्य नाश: यवनकेतुना अकारणो कृत: ।

सार्धत्रयं यद्विदुषां प्रसिद्धं तत्र प्रासेद्धः **फडणीसनानां** ।
तेनापि सार्धं विदुषा वितेने स्पर्धां **महादाजिरमुष्य** वंश्यः ॥ १४७
राणोजिपुत्रः किल **दत्त**नामा निर्बन्धपृष्टो यवनैर्गृहीत्वा ।
प्रत्युत्तरं स्पष्टतरं ददौ यद् भूयोऽपियोत्स्ये सति जीवशेषे ॥ १४७
निसर्गरम्ये सुजले समृद्धे द्वारैर्दृढे **द्वारवती**समाने ।
उद्यानभूषे विहिते उभाभ्यां **धारोज्जयिन्यौ** निजराजधान्यौ ॥ १४८
अजाविकानां परिपालकानां सन्त्यज्य वृत्तिं निजपूर्वजानाम् ।
रतः प्रजाना परिपालनेऽभूद् मल्लारिराजो नृपतिः प्रतापी ॥ १४९
प्रवेश्य सैन्यं परकीयदेशे पुराणि दग्ध्वा प्रसभं महान्ति ।
होल्युत्सवं यः सततं चकार स किं ततो **होळकरो** बभूव । १५०
इन्द्रस्य वेन्दोः पुरमस्ति तस्य यथार्थनाम्नी ननु राजधानी ।
इन्द्रस्य भूतिः सुषमाऽपि चेन्दोरिन्दूरमध्ये वसतः सुखेन ॥ १५१
मल्लारिदेवः कुलदेवताऽस्ति यथा तदीयाऽपि तथा मदीया ।
तुल्योऽभवं तेन यतः समानौ रंकश्च राजा च दृशा नियन्तुः ॥ १५२
शूरोऽप्यसौ पानिपतं विहाय यातः प्रभुस्त्रीजनरक्षणाय ।
आज्ञा प्रभूणामविचारणीया श्रेष्ठापवादः कुजनस्वभावः ॥१५३
त्रिमूर्तिरंगीकुरुते स्म रक्षां सृष्टेस्तथामी अपि मालवानाम् ।
कर्माणि संयुज्य कृतानि यद्वत् सिध्यन्ति तद्वन्न पृथक् कृतानि ॥१५४

अहल्यादेवी

स्नुषा तदीया सुकृतैः प्रजानां मल्लारिसिंहासनमारुरोह ।
प्रजाः प्रजाः स्वा इव तन्त्रयित्वा राजन्वतीं या विदधे स्वभूमिम् ॥ १५५

पंचैव कन्याः प्रथिता जगत्यां पापानि यासां स्मरणाद्व्रियन्ते ।
न वेद्मि तासां प्रथमा भवेत्का तपस्विभार्या नृपतिस्नुषा वा ॥* १५६

पूर्वाधिरूढा पदवीमहल्या भूत्वा सुनम्रा रघुनाथपादे ।
परा पराभूतवती महान्तं बिनैव युद्धं रघुनाथवीरम् ॥ १५७

सुरालयास्तीर्थजलावतारा अनाथसत्राण्यपि पाठशालाः ॥
मार्गेषु पूर्तानि बहूनि नित्यं कुर्वन्ति साक्ष्यं तदुदारतायाः ॥ १५८

रुद्राक्षभूषस्य तपोधनस्य पतिव्रताऽरण्यतपस्विनी स्त्री ।
एतानि कर्तुं न भवेत्समर्था यशश्च लभ्यं न विना सुकृत्यैः ॥ १५९

इन्दूरधान्यां मिथिलोज्जयिन्योरैश्वर्यवैराग्य-गुणद्वयाढ्याः ।
श्रीदेव्यहल्या जनको विदेहो योगीश्वरो भर्तृहरिः शशासुः ॥ १६०

झाशी-निवासिन्यबलाऽपि लक्ष्मीः पुंवत्प्रगल्भा रणचंडिकेव ।
इन्दूरवासिन्यबला त्वहल्या पुंवत्प्रगल्भाऽपि सरस्वतीव ॥ १६१

विना युद्धं जयो महान्

देव्याः समृद्धेः परिशील्य वार्तां सेनासनाथो रघुनाथमन्त्री ।
इंदूरमासाद्य विहंगगत्या देवीमहल्यां परुषं बभाषे ॥ १६२

रघु०- हे राज्ञि सामन्तपदाधिपत्वात् त्वयास्ति देयः करभार आदौ ।
प्रयच्छ मे भारशतानि हेम्नो नो चेद् गृहाणाद्य करे कृपाणम् ॥ १६३

---

* अहल्या द्रौपदी सीता तारा मन्दोदरी तथा ।
पंच कन्याः स्मरेन्नित्यं महापातकनाशिनीः ॥

अहि०— सुस्वागतं ते रघुनाथभट्ट किं याचसे केवलमद्य वित्तम् ।
सिद्धाऽसि दातुं शिवभूपरीत्या विप्राय तुभ्यं विततं स्वराज्यम् ॥‡ १६४
रघु०— भटोऽस्मि शूरश्चतुरंगसेनो न दक्षिणार्थी द्विजभिक्षुकोऽहम् ।
जेता दिशानां रघुणा समोऽयं यथार्थनामा रघुनाथराजः ॥ १६५
अहि०— संत्यज्य राज्यं यदि दीयमानं युद्धाय मामाह्वयसेऽद्य दर्पात् ।
ममाबलाया अबलाजनानां सिद्धास्ति सेनापि सुसज्जशस्त्रा ॥ १६६
रघु०— योधा यदीयाः प्रतिबन्धभंगं विधाय याता **अटकस्य** पारम् ।
क्रुद्धोऽपि सोऽहं हसितुं प्रवर्ते दृष्ट्वा तवेदं सुकुमारसैन्यम् ॥ १६७
चन्द्राननानां चलकुंडलानां नितंबिनीनां गजगामिनीनाम् ।
बिम्बाधराणां मृगलोचनानां पीनस्तनीनां कलनूपुराणाम् ॥ १६८
भृंगालकानां नवयौवनानां विलासिनीनां नवशाटिकानाम् ।
सज्जायुधा ह्वेपयतीव नूनमनीकिनीयं मदनस्य सेनाम् ॥ १६९
परं तपस्वी तपने जितेन्द्रियस्ततोऽपि वीराः समरे जितेंद्रियाः ।
नाहं प्रमादी मुनिरास्मि कौशिकः संमोहनास्त्रं मयि ते ततो वृथा १७०
अहि०— श्रुत्वा मुखात्ते युवतिप्रशंसां जितेन्द्रियत्वं तव शंकनीयम् ।
श्लाघाऽपि शौर्यस्य वृथा तथैव वाच्येव वीर्यं प्रथितं द्विजानाम् ॥ १७१
रघु०— जयद्रथोऽयं रविरेष साक्षात् पराक्रमो मे न चिरात्प्रसिद्धयेत् ।
जिगीषती मामबलाबलेन ध्रुवं गमिष्यस्यबलेऽनुतापम् ॥ १७२

---

‡ शिवभूपतिना श्रीरामदासाय स्वराज्यं समर्पितम् । विरागिणा रामदासेन च तत् नृपतये प्रत्यर्पितम् । राज्ये गुरोः स्वामित्वं दर्शयितुं काषायवर्णं कौपीनं शिवराजेन ध्वजे नियुक्तम् ।

अह०- जयाजयौ स्तः परमेशहस्ते केनापि गर्वो न कदापि कार्यः।
किं रावणो वा धृतराष्ट्रजो वा मेने पुरा स्वं विजयं दुरापम्॥ १७३

अतुल्ययुद्धे सहसा प्रवृत्ते वृणोतु कामं प्रबलं जयश्रीः।
कर्तव्यबुद्धया प्रतिकारयत्ने जितं हतं वा वृणुते यशःश्रीः॥ १७४

दिगन्तकीर्ते रघुनाथराज सेनापते माधवराजमान्य।
संभावितस्यापयशःप्रसंगः करोति दुःखं मरणातिरिक्तम्॥ १७५

जित्वाऽबलां मां तव न प्रतिष्ठा मैत्री च वैरं च समेषु युक्तम्।
कुर्यात्कृपां मय्यबलासहायः **पांचालजा**-शाश्वत-पक्षपाती॥ १७६

जितो भवेश्चेन्ममसैनिकैस्त्वं प्राणा भवेयुस्तव भारभूताः।
दिष्ट्यात्र रोहत्यहिफेनवल्ली हर्तुं समर्था तव भाविभारम्॥ १७७

एकत्र वापीमपरत्र कूपं विलोक्य वीरोऽपि बभूव मुग्धः।
परं क्षणार्धात्स्फुरितोत्तरोऽभूद्वातैर्न कम्प्रास्तरुवन्महीध्राः॥ १७८

(**रघु**० स्वगतम्)

जेयपकीर्तिर्ह्यजये विनाशो नूनं प्रसंगोऽयमभूतपूर्वः।
इच्छामि गन्तुं समरं विहाय यशःशरीरेण सुरक्षितेन॥ १७९

शिवप्रणीतं **जयसिंह**बोधं ह्यनन्यगत्या शरणं प्रपद्ये।
शौर्येण सर्वत्र भवेन्न कार्यं श्रेयः क्वचित्स्याच्च पलायनेऽपि॥ १८०

(प्रकाशम्)

श्रुत्वा त्वदीयां चतुरत्वकीर्तिं परीक्षितुं तां समुपागतोऽस्मि।
व्रजामि तुष्टः कुशलं तवास्तु जेतुं धनं सन्ति दिशो दशापि॥ १८१

---

‡ अनीकिनी = सेना।

निवार्य युक्त्या करभारदानं स्थैर्याय सन्धेः समयज्ञचित्ता ।
दीपोत्सवानन्तरमागतं तं स्मिताननाऽभाषत देव्यहल्या ॥ १८२
विनोदमात्रं तव पूर्ववाक्यं ज्ञातं मयासीद् रघुनाथबन्धो ।
भ्रातृद्वितीयोत्सवपालनार्थी भ्राता न लुभ्येद्धनिधनाय ॥§ १८३
भ्रातः समुत्तिष्ठ चिरायसे किं नीराजये त्वां पुरतः सुराणाम् ।
स्वेच्छानुसारेण धनं प्रयच्छ स्नेहः स्थिरः स्यान्न धनं प्रधानम् ॥१८४
रघु० न केवलं मे विफलाऽधिकाशा दातव्यतां याति धनं ममैव ।
उपस्थितोऽयं विषमप्रसंगो विडंबनैषा विषमा, न भूषा ॥ १८५
सन्धेः स्थिरत्वं क्रियते विवाहैर्वाचः स्थिरत्वं शपथैश्च लोके ।
नीराजयन्त्या प्रभुसंनिधौ मां प्राप्तस्त्वया तद्धितयं भगिन्या ॥ १८६
यशस्तदीयं शरदिन्दुगौरं मत्या च सा शारदया समाना ।
मुखं च तुल्यं शरदम्बुजेन विशिष्टरूपेषु गुणा वसन्ति ॥ १८७

* * *

सह्याद्रिदेशे शिवराजगोत्रे श्रीशाहुराजोन्नतवंशलग्ना ।
पवारकन्या गुणवत्पताका तुल्या सुमित्रेयमहल्ययैव । १८८
कुलत्रयानन्ददसच्चरित्रा श्रीरामसौमित्रसमानपुत्रा ।
सन्मन्त्रदात्री जननीं सुमित्रा संसारयात्रां क्रमतां चिराय ॥ १८९
शाहोः स्तुतिर्मालवगौरवस्य निमित्तमासीदितियुक्तमेतद् ।
यत् सांप्रतं मालवगौरवं स शाहोः कृपायाः परिपाक एव ॥ १९०

इति मध्यधाराः ।

---

§ विजयादशम्यां पुण्यपत्तनान्निष्क्रान्तः रघुनाथः इंदूरं दीपोत्सवानन्तरमेव आसादयेत् । आतुलसीविवाहं भ्रातृत्सवस्य अवसरः ।

अर्वाचीन धाराः

अथ विलीनीकरणम्

कर्तव्यदक्षाः[1] प्रभवः प्रजानां भूतेः प्रजानां[2] प्रभवः पुराऽऽसन्
स्फूर्तेः कवीनां, यशसां भटानां, भीतेः खलानां, पयसां च वृष्टेः
॥ १९ ॥

उत्कर्षहेतोर्नवभारतस्य श्रीवल्लभेनायसमानसेन ।
भूवल्लभानामधिकारपाशादुन्मोचिता भारतभूमिरेषा ॥ १९२
छिन्नाऽभवद्राजपरम्परेति खिन्नांतरंगो न भवेः कवे त्वम् ।
जाता इदानीं नवशासनेन । सर्वेऽपि भूपाः सकलाश्च राज्ञयः
॥ १९३

कैवल्ययुक्तं परमेशरूपं द्वितीयभावेन विवर्जितंच ।
कालानुरोधेन यदृच्छया वा यदेकमासीद् बहुतां गतं तत् ॥ १९४ ॥
औदार्यशौर्यादिगुणान् प्रयोक्तुं लब्धावकाशा वयमद्य भू-पाः
गुणैर्यथा राजति राजराजिस्तथा कदाचिन्न किरीटरत्नैः ॥ १९५

नृपान् प्रति ।

प्राज्यं स्वराज्यं तृणवद्विसृज्य निर्माल्यतुल्या वयमद्य जाताः ।
इत्थं नृपा मा क्रियतां विषादो दत्वा दृशं देशहिते विशाले ॥ १९६
*प्रसह्य नीता विषयोपभोगाः कुर्वन्ति दुःखं हृदये चिराय ।
न्यस्ताः स्वयं ते तु न दुःखहेतुः सुभाषितं भर्तृहरेः प्रमाणम् ॥ १९७

---

१ राजानः २ उत्पत्तिस्थानम् * अग्रिमपृष्ठे द्रष्टव्यम्

यदंगिनः स्याद्धितकारि किंचिदंगानि बाधेत न वस्तुतस्तद् ।
२ आभाणको वः श्रुतिगोचरः स्यात्सर्वं पदं हस्तिपदे निमग्नम् ॥ १९८
३ कृत्यं भवेद्यन्मधुकोशहान्यै दुःखाय तत्स्यादपि मक्षिकाणाम् ॥
व्यक्तिः समाजश्च सदा भवेतां स्वार्थैकदृष्ट्याऽपि मिथोऽनुकूलौ
॥ १९९

दुर्दैवयोगात्स्वहितेऽप्यसिद्धे चाणक्यवाक्यं शरणं विधेयम् ।
*एकं त्यजेत्साधयितुं कुलार्थं राज्यं त्यजेद्राष्ट्रहिताय तद्वत् ॥ २००
या राजनिष्ठा जनता तदीया तयाऽपि धार्यां धृतिरन्तरंगे ।
चलेऽधिकारे विगतेऽपि सन्तो भूपे कृतज्ञाः सततं भवेयुः ॥ २०१
† प्रजागृहेष्वग्निमुखे पतत्सु कश्चित्कुराजा निजहर्म्यसौधे ।
वीणाविनोदाद् विरतो न भूतः क्षुब्धाः प्रजास्तेन ततोऽपरक्ताः
२०२

---

१ अवश्यं यातारश्चिरतरमुषित्वाऽपि विषया
वियोगे को भेदस्त्यजति न जनो यत्स्वयममून् ।
व्रजन्तः स्वातन्त्र्यादतुलपरितापायमनसः
स्वयं त्यक्ता ह्येते शमसुखमनन्तं विदधति ॥ भर्तृ वै. श १६

2 The greater includes the less.

3 That which is not in the interest of the bee-hive cannot be in the interest of the individual bee.

Pandit J. Neharu

* त्यजेदेकं कुलस्यार्थे ग्रामस्यार्थे कुलं त्यजेत् ।
ग्रामं जनपदस्यार्थे आत्मार्थे पृथिवीं त्यजेत् ॥ २००

† While Rome was burnig King Nero was fiddling

एकापराधे सकलस्य दंण्डः क्षोभे जनौघस्य कुतो विवेकः? ।
सहस्रशीर्षा द्विसहस्त्रहस्ता प्रजा समर्था निजहेतुसिद्धयै ॥ २०३
स्वरक्षणाय स्वयमेव पूर्वं राज्ञेऽधिकारः प्रजया वितीर्णः ।
प्रत्यर्पितः स प्रभुणा प्रजायै मेघोदकं याति पुनः समुद्रम् ॥ २०४
नौकाधिरूढः शकटः कदाचिन्नौकाऽन्यदा स्याच्छकटाधिरूढा ।
भूमेः प्रभुत्वं क्रमशो विभाति प्रजासु किंवा नृषतौ तथैव ॥ २०५

आधाराभावदोषपरिहारः

दुष्यन्तभीतो हरिणो धरण्यां स्तोकं प्रयातो गगने च भूरि ।
कुर्वन्ति काव्ये कवयस्तथैव सूत्रेण पत्रात्म–पतंगलीलाम् ॥ २०६
यत् तन्तुनाभो वितनोति जालं सृष्टिस्तदीयाऽस्ति निजप्रसूतिः ।
त्रिशंकुवत्तिष्ठतु सान्तराले आधारहीना न तथापि साऽस्ति ॥ २०७
आधारहीनस्त्वितिहासकारः पदं न यात्यप्सु यथा जलौकाः ।
विनष्टदण्डो जरठो यथा वा विच्छिन्नपक्षो हयथवा जटायुः ॥ २०८
कविः स्वभावाद् गगने विहारी अनिच्छयैवावतरेत् स भूमिम् ॥
प्राप्तोऽन्तरिक्षं त्वितिहासकारो विश्रान्तिमाप्नोति धरावतारात्॥२०९

काव्यहेतुः

आख्यायिका–काव्य–पुराण–नाट्यं तत्तत्कवीनां परिशीलय तृप्तः
श्रीशारदायाश्चिरसेवकोऽहमुद्गारमेवं विधमुद्विरामि ॥ २१०
भोज्या यदा स्यू रसवत्पदार्थाः सेव्यास्तदा ते स्वजनैः सहैव ।
सपद्यशोषं रसवृद्धिकामैः साहित्यसेवाऽपि तथा विधेया ॥ २११

पश्योदग्प्लुतत्वाद् वियति बहुतरं स्तोकमुर्व्यां प्रयाति । शाकुं. १

कवेरधिकारः

साहित्यमीदङ्मधुरं च यस्या नापेक्षते सा कविताऽङ्गभूषाम् ।
मनोहरत्वं वद किं युवत्या लावण्यवत्याः कनकाद्यधीनम् ॥ २१२
वर्ण्याः सभोजाः कवयश्च यस्यां कार्यं न तस्याः कविकौशलेन ।
न्यूनाधिको यद्यपि शर्करांशः पयःपदार्थस्य रुचेर्न हानिः ॥ २१३
कटूवम्लतिक्तादिरसैर्विधातुं स्वादिउशाकं कुशलत्वमिष्टम्
उद्दिश्य शुष्कं विषयं कवित्वे महाकवेरेव मतिः समर्था ॥ २१४

वाङ्मयचौर्यम् ?

पित्रुत्सवे पूर्वजतृप्तिहेतोर्यौज्यं तदीयं प्रियवस्तुजातम् ।
बुध्द्या प्रयुक्ता अत एव काव्ये प्राचां कवीनां पदकल्पनाश्च ॥ २१५
कर्तुं गृहे स्वे तनयाविवाहं यथा दरिद्रो वनुते धनाढ्यान् ।
वस्त्राणि पात्राणि धनं गृहं च वचांसि दीनान्युपयुज्य लोके ॥ २१६
याचे तथाऽहं प्रतिभादरिद्रः कविप्रकाण्डान् प्रतिभासनाथान् ।
पदानि वाक्यानि सुभाषितानि पदार्थहच्छर्विलककस्तु नास्मि॥¶२१७

कविपरिचयः

कृष्णावेण्योरन्तराले पवित्रे ग्रामः पुण्यः पाट्खलाख्यः प्रसिद्धः ।
कृष्णावेण्या—पुण्यवेणीव लग्ना यत्र स्निग्धा श्रीजरंडेशदृष्टिः[१]॥ २१८
शंखाकारो यत्र कृष्णाप्रवाहो यस्मात्क्षेत्रं माहुली क्रोशमात्रम् ।
ज्वारी-धान्यं यत्र मुक्ताफलाभं यस्मिन्गावः शंभुगाहेन तुल्याः॥ २१९

¶ मृच्छकटिके शर्विलकेन परेषां द्रव्यस्य मूल्यवतामलंकारणां वा अपहारः कृतः । मया तु सर्वं प्रत्यर्पणार्थं गृहीतम् । १ जरंडा = मारुतिक्षेत्रम्

ग्रामायव्ययलेखकः कुलगुरु र्ग्रामस्य तत्राभवत्
भारद्वाजभवो घिसासकुलजः श्रीविष्णुशर्मा द्विजः।
धर्माचारपरायणश्च विहितं कर्मानुष्ठाय यो।
ह्यस्वस्थोऽपि जरारुजादिविवशोऽप्यन्नांबु नासेवत ॥ २२०

कृष्णातीरे शैलसोपानमाला वेदिर्बद्धाऽश्वत्थमूले च येन।
कृष्णास्नानं वर्जितं नैव येन किंवा न श्रीरामनिष्काम सेवा॥ २२१

पुत्रस्तस्य श्रीमहादेवशर्मा कर्तृत्वेन ख्यातनामा समंतात्।
रक्षेद् हर्म्यं मारुतेर्येन बद्धं स्थैर्यात्कीर्तिं तस्य वर्षासहस्रम्॥ २२२

कृष्णावेण्योरुत्सवे सुप्रवृत्ते स्वीये हर्म्येऽसौ महादेवशर्मा।
पुत्रं प्राप्नोत्पार्वतीकुक्षितो मां वाळिंबे यन्मातुलस्योपनाम ॥ २२३

यत्राज्ञानं देशवाचोऽपि तत्र देवांग्लानां वाचयोः कैव वार्ता?
अंगुष्ठांको यत्र लेखांकमुद्रा तत्र स्वप्नेष्वेव साहित्यचर्चा॥ २२४

"न पाठशाला न गुरु र्न विद्या कुग्रामवासात्सुलभा सुतस्य।
इतः प्रवासा[१] कृषिलाभहानिरत्रैव वासाच्च सुतस्य मौढ्यम्॥ २२५

इत्थं सचिन्तं जनकं मदीयमाश्वास्य वाक्यैर्मधुरैस्तदानीम्।
गोपालशर्मा जनकानुजो मे शाहोःपुरं मामनयद्विनेतुम्॥ २२६

तत्रैव भाषात्रितयत्रिवेण्यां कृत्वा प्रवेशं गुरुसंनिधाने।
अहं स्वतन्त्रोऽकरवं विहारमन्यासु भाषासरितासु किंचित्॥ २२७

महादेवात्मजोऽगायत् कुलकर्णी-दिगंबरः।
इमा धारा-यशो-धाराः शारदा-परिचारक॥ २२८

शाहोःपुरं = सातारा. विनेतुं = अध्यापयितुम्.

पाठशालायां महाराष्ट्री, देवभाषा, आंग्लभाषा चाधीताः पाली अर्धमागधी हिंदी च स्वातन्त्र्येणाधीताः इत्यर्थः।)

रूपं विकारि क्षणभंगुरं च संबन्धिनो ज्ञातुमलं कथं स्युः ।
उल्लिख्य चित्रं सचरित्रमत्र यते ततोऽहं स्मृतिबोधहेतोः ॥३२९

सातारानगरे च जुन्नरपुरे मुंबापुरे नासिके
शिष्यैर्यस्य शतैर्मितैः परिचितो गीर्वाणवाणीरसः ।
छात्रार्थे समपादयत्सुरगिरा यः शारदा पत्रिकां
योऽकार्षीद् बहु रंजनं च सुहृदां श्लोकैः प्रसंगोचितैः ॥ ३३०

कवेस्तस्य यथाशक्ति कर्तुं योग्यं प्रतिप्रियम् ।
पुस्तकानां प्रचारेण शिष्यैराप्तैः सुहृद्वरैः ॥ २३१

शारदापत्रलोपेऽपि शारदासेवनव्रतः
मानसोद्भूत-पद्माब्जैः पूजये **शारदा**पदम् ॥ २३२

वल्मीकतो मे जननं न जातं वाल्मीकिना मे तुलना कथं स्यात् ।
वल्मीकवत् किन्तु कणैः क्षणैश्च काव्यं मदीयं परिवृद्धिमाप्नोत् ॥ २३३

द्रव्यस्य दानादपि सावधानं कर्णप्रदानं कवितोषकारि ।
प्रत्यग्रकाव्यश्रवणेन मित्रात्कोऽन्यो नयेताऽसमयेऽपि कालम् ॥ २३४

श्रवणाद्वाचनाद्दानाद्गुणदोषविवेचनात् ।
यैः प्रोत्साहनं दत्तं सर्वे तेऽर्हन्ति धन्यताम् ॥ २३५

दूरस्थाः सुहृदस्तथैव रसिका वैदेशिकाः पंडिताः ।
सर्वे शिष्यगणाः पठन्तु कवितां श्रीशारदाग्राहकाः ॥
हेतोरस्य मया व्ययेन महता नीता प्रकाशं कृतिः ।
प्रीत्या तां परिशील्य मामनुशयाद्रक्षन्तु ते सर्वथा ॥ २३६

पत्राणां लिपिशोधकस्य बणिजां मुद्रालयस्वामिनाम् ।
दत्वा शुल्कमनल्पतां गतमहो लाभः कियान्वा कवेः ? ॥
तोषो वाचकमानसस्य कवितापाठेन जायेत चेत् ।
कार्यः सोऽर्थसनाथवाक्यनिचयैस्तुष्टैः कवेर्गोचरः ॥ २३७

सतीव योषित्प्रकृतिः सुनिष्ठा पुमांसमन्वेति दिवं प्रयातम् ।
काव्यप्रियो भोजनृपो मृतोऽपि प्रोत्साहयत्येव कवीन् पुरेव ॥
भोजो ददौ प्राक्तनसत्कविभ्यः प्रत्यक्षरं लक्षमितान् सुवर्णान् ।
कश्चित्स दद्यात्प्रतिपद्यमद्य गुणानुसारं पणमाणकं वा ॥ २३८

वाचकप्रार्थना

द्वित्राणि पद्यान्यपि काव्यतो मे कण्ठे वसेयुर्यदि वाचकानाम् ।
मन्येय सर्वान्सफलान् प्रयत्नान् वाच्यं किमन्यत्कविताप्रणेत्रा ॥ २३९
विधौ कलंकः कुसुमे क्षणायुस्तापो रवौ नीचगतिश्च तोये ।
सेव्यं सदोषं यदि वस्तुजातं मत्काव्यमेवास्तु न रोषपात्रम् ॥ २४०
स्याद्देवभाषा जनभारतीति कांक्षन्ति मान्या नवभारतेऽस्मिन् ।
तस्याः प्रसारः सुगमत्वयोगाज्जायेत भूरीदृशनव्यकाव्यैः ॥ २४१



भोज-भर्तृहरिभ्यां सह काव्यविनोदः

मान्धाता किल सार्वभौमनृपतिर्भूमेर्विजेता रघुः । §
उद्धर्ता जलधे र्भुवो भृगुवरो रामस्तनूजापतिः ॥
अन्ये चापि युधिष्ठिरप्रभृतयो याता दिवं भूभृतः ।
नैकेनापि समं गता वसुमती कर्षेत यस्तस्य भूः ॥

स्नानं शीतलवारिणा हि सततं धिग् धिग् गृहस्थाश्रमम् भर्तृ० ।
नेयत्तास्त्यभिषेकसेव्यपयसो नो तापलोपाद्भयं ।
कार्यौत्सुक्यवतामशीघ्रतपनाद् रुन्ध्यान्न कार्यं मुधा ।
स्रोतस्तुंग-तरंगतोयतरणे साम्राज्यलाभोत्सवः ।
स्नानं शीतजलैः शतामयहरं स्वातन्त्र्यदं शं–करम् ॥

आयुर्वर्षशतं नृणां परिमितं रात्रौ तदर्धं गतं ।
वाक्यं भर्तृहरे र्यथार्थमभवद् ह्यज्ञातदीपे युगे ॥
सम्प्रत्यध्ययनं क्रयः प्रवसनं क्रीडा तथाथोर्जनं ।
शक्यं येन कृतं निशोऽपि समये **दीपाय** तस्मै नमः ॥

सर्वं यस्य वशादगात् स्मृतिपथं कालाय तस्मै नमः ॥ भर्तृ०
वैरं नश्यति, दुःखमेति सुखतां कीर्तिं गुणो विन्दति
सर्वं हीनगुणं प्रयाति विलयं श्रेष्ठं पुनस्तिष्ठति ।
वीतं भाति वयो युगादिमधुरं दूराद्यथा पर्वता
मत्ता यस्य वशाद्भवन्ति विमदाः **कालाय** तस्मै नमः ॥

---

§ मूलश्लोकः एकादश पृष्ठे द्रष्टव्यः

समस्या-पूरणम् ।

संग्रामस्य प्रसंगे प्रतिभटशमने सामदानाद्युपायैः
वस्त्रालंकारभूमिद्रविणवितरणे वीर-विद्वत्-कविभ्यः ।
अर्थिप्रत्यर्थिवादे स्मृतिशतवचनैस्तथ्यमिथ्याविवेके
" धारेन्द्राणां " धरायां रविसममहसां " राजते राजतेजः "॥१॥
युक्त्या शक्त्या प्रयत्नैः परतटगमने दुस्तरापत्तिसिन्धोः
संख्यातीतप्रजानां तनयवदवने शिक्षणे वृत्तिदाने ।
श्रान्त-स्वान्तस्य तोषे परनिजकवनैः शासने चोद्धतानां ।
' धारेन्द्राणां ' धरायां रविसममहसां " राजते राजतेजः " ॥२॥
येषां साम्राज्यभारं सुरगुरुचतुरा मन्त्रिणो निर्वहन्ति
येषां धर्मासनस्थास्तपनतनयवन्न्यायदाने सुदक्षाः ।
येषां चार्थव्यवस्था जनयति पितृवद्बन्धुभावं प्रजासु
तेषां " धारेश्वराणां " रविसममहसां " राजते राजतेजः " ॥३॥
येषां वंशे प्रभूता धवलितभुवना मुंज-भोजादि-मुक्ताः
येषां संसद्यसंख्याः कविवरमणयो भासुरा बुद्धिभासा ।
येषां सद्ग्रन्थमाला प्रभवति भवितुं " भारतीकंठभूषा "
तेषां धारेश्वराणां रविसममहसां " राजते राजतेजः " ॥४॥

पुण्यश्लोक श्रीदेव्यहल्या ।

" राजते राजतेजस्ते " " देव्यहल्ये " राजयोगिनि ।
तोषयद्भूषयद्व्यापि कीर्त्या कृत्यैश्च भारतम् ॥

दि. म. कुलकर्णी.

परिशिष्टम् १

श्रीमच्छत्रपतेः शाहुराजस्य द्विशतसांवत्सरिकी श्राद्धतिथिः

श्रीमन् महाराज गुणज्ञ शाहो भूप प्रभूतं भवदीयभाग्यम् ।
यशस्त्वयाऽऽप्तं प्रतिकूलकाले लब्ध्वा जनानां गुणिनां सुसाहच्यम् ॥ १ ॥
पौत्रः शिवाजेः सुगृहीतनाम्नो गोब्राम्हणानां प्रतिपालकस्य ।
पुत्रस्तथा त्वं निजधर्महेतोः संत्यक्तजीवस्य तदीयसूनोः ॥ २ ॥
बद्ध-स्वतातो हतसोदरोऽपि २रक्ष जीवं यवनाधिपस्ते
दुराग्रहः स्वान्यमतासहिष्णुर्धर्मान्तरं त्वां न निनाय बद्धम् ॥ ३ ॥
पिता हतस्ते, जननी च बद्धा कारागृहे शैशवमप्यतीतम् ।
स्थितश्चिरं जीवितसंशये त्वं; तथापि दीर्घं कुशलं तवायुः ॥ ४ ॥
कारागृहे निक्षिपता भवन्तं औरंगजेबेन कृतौ विवाहौ ।
यथाविधानं कुलकन्यकाभ्यां बद्धस्य तेऽतीव विचित्रमेतत् । ५ ॥
दिल्लीशबन्धाद्यमपाशतुल्यात् पितामहस्तेऽघटयत्स्वमोक्षम् ।
बन्ध्यप्रयत्नो वधमाप तातस्त्वया तु लब्धो हि सुखेन मोक्षः ॥ ६ ॥
प्राप्तानि दुर्गाणि पुनः प्रयान्ति रिपोर्वशं किं करवाणि तर्हि ।
इत्थं सचिन्तो १बनवाटिकायां कृषीवलस्याश्रयमाश्रयस्त्वम् ॥ ७ ॥
उष्णां यवागूं यदि भोक्तुमिच्छा पर्यंतभागात् क्रमशो व्रजान्तः ।
वृद्धागिराऽन्योक्तिमयीति मत्वा त्वयोपयुक्ता शमनाय शत्रोः ॥ ८ ॥
कृष्णोर्वशीवेणिपवित्रगात्री सर्वत्र सह्याद्रि-कृपातपत्रा ।
श्रोत्रद्वये २ स्वामियुगात्तमन्त्रा ३ सप्तर्षिगोत्रा तवराजधानी ॥ ९ ॥
बल्लाळ-बाज्यादि-भटा भटास्ते शौर्येण नीत्या प्रभु-निष्ठया च ।
दिल्लीश्वरस्यापि महेश्वरत्वमाकृष्टवन्तस्तव राजधानीम् । १० ॥
सौजन्यतोऽन्तः कलिवारणाय आतुंगभद्रं किल वारणायाः ।

---

१ बनवडी ग्रामे २ श्री रामदासस्वामी श्रीब्रह्मेंद्रस्वामी च
उर्वशी=उरमोडी नदी वेणि=वेण्या ३ सातारा नाम्नी

पितृव्य–पत्नी–परितोषहेतोः समार्पयस्वं करवीर–राज्यम् ॥ ११ ॥
विलासशीलस्य शमप्रवृत्ते राज्यं समृद्धं ववृधे दिशासु ।
विरोधपूर्णं भवदीयमेवं चित्रं चरित्रं परिशीलनार्हम् ॥ १२ ॥
संप्रेष्य शूरान् नृपनीतिविज्ञान् देशान्तरेष्वाक्रमणाय वीरान् ।
निर्माय सामन्तनृपान् प्रभूतान् कृतं महाराष्ट्रपदं यथार्थम् १३
त्वया नियुक्तैः पुरुषैः कदापि नेच्छा त्वदीया विफलीकृताऽऽसीत् ।
अनन्यतुल्या खलु योजना ते मनुष्यरत्नार्घपरीक्षकस्य ॥ १४ ॥
न्यग्रोधवृक्षस्य यथोपवृक्षाः कुर्वन्ति साम्यं निजवैभवेन ।
सामन्तचक्रं तव शाहुराज चकार साम्यं तव वैभवेन ॥ १५ ॥
स्निग्धस्वभावा सुकुमारगात्री पतिव्रता ते "‡सुकुमार देवी" ।
योगेन रूढया च सधर्मचर्या बन्धे समृद्धौ निधनेऽन्वगात्त्वाम् ।१६
अजिक्य दुर्गस्य तले त्वदीय–प्रासादशेषे सकलाः समेत्य ।
प्रजास्वदीया वयमादरेण श्रद्धांजलिं तेऽद्य समर्पयामः ॥ १७
‡ शुनो गुणानामपि यः कृतज्ञश्चकार मूर्तिं स्मृतिरक्षणाय ।
नृणां गुणानाँ तु स एव शाहुः कुर्यादुपेक्षामिति नैव शक्यम् ॥ १८ ॥
शूरा उदारा गुणिनां गुणज्ञाः स्वधर्मनिष्ठा विदुषां सहायाः ।
श्रीशाहुवंश्या अपि शोभयेयुः *सौमित्रयः पूर्वपरम्परां स्वाम् ॥ १९ ॥

---

‡ माहुली क्षेत्रे शाहोः सारमेयस्य पाषाणमयी मूर्तिः तिष्ठति ।
*श्रीसुमित्रादेवी पुत्राः (लक्ष्मणसदृशाः इति ध्वनिः) श्री प्रतापसिंह
राजाद्यः १ सुकवारबाई

अस्य काव्यस्य प्रसंगात् धारा–यशोधारा–काव्यस्य

विषयः स्फूर्तिगोचरतां गतः ।

परिशिष्टम् २

श्रीमल्लारिः प्रसन्नोऽस्तु ।

" धाराधीश महाराज महाराष्ट्रकबेस्त्वयि ।
विराजन्तां स्थिराः पुण्या आशीर्वादपरम्पराः ॥ १॥
सार्थानामपि पद्यानां वैयर्थ्यं जायते ध्रुवम् ।
अर्थाभावादशक्यं स्याद्यदिं तेषां प्रकाशनम् ॥ २ ॥
तनूजा कन्यका लोके यथा धन्या वरार्पणात् ।
कविताया मनोजायास्तथेष्टं रसिकार्पणम् ॥ ३ ॥
पठने पाठने व्यग्रो देववाण्येकसेवकः ।
वृद्धवेतनशून्योऽहं सचिन्तस्तत्प्रकाशने ॥ ४ ॥
भूपत्वाद् भोजतुल्यत्वाद् गुणज्ञत्वाच्च भूपते ।
प्रार्थये कृपया देयो हस्तः काव्य– प्रकाशने ॥ ५ ॥

राज्ञः संभवनीयं उत्तरम् ।

" संस्थानानां विलीनत्वाद् भूपाला नामतो वयम् ।
अकाले प्रार्थनैषा ते निरुपायः कवेऽधुना ॥ ६ ॥
प्रातिकूल्येन कालस्य भूपो धारा ' सरस्वती ' । †
अद्य जाता निराधारा विदुषां तर्हि का कथा? " ॥ ७ ॥

---

† धारायां सरस्वतीमन्दिरं यवनैः आक्रान्तं वर्तते । तेन सा निराधारा ।

अद्य धारा निराधारा निरालंबा सरस्वती ।
पंडिताः खंडिताः सर्वे भोजराजे दिवंगते ॥

भोज प्रबन्धः ।

कवेः प्रत्युत्तरम्

" प्रसीद मैवं प्रतिवक्तुमर्हसि गजः शयानोऽपि न हीयते हयात् ।
वशंगतोऽपि द्विरदोऽन्यपोषकस्तथा भवेत्किं स्ववशोऽपि कुक्कुरः ॥ ८
चिरं प्रसिद्धाः परमारवंशजा आधारभूता विदुषां द्विजन्मनाम् ।
कथं भवेयुः सहसा पराङ्मुखा मय्येव हित्वा सहजामुदारताम् ॥ ९
अप्यकार्यशतं कृत्वा कार्यं पोष्यस्य पोषणम् ।
विपद्यपि न तत्त्याज्यमादेशोऽयं मनोर्महान् ॥ १० ॥
मितव्ययः प्रशस्तोऽस्ति व्यवहारे बुधैः सदा ।
नातिव्ययोऽपि दोषाय कृतश्चेद् यशसां कृते+ ॥ ११ ॥
आपत्कालेऽपि न त्याज्यं पितृपैतामहं व्रतम् ।
चातकैः किं निदाघेऽपि पीयते पंकिलं पयः ॥ १२ ॥
आपद्येव परीक्ष्यन्ते सतां शीलगुणाः सदा ।
वर्षासु वारिदानेन दातृत्वं नैव सिध्यति ॥ १३ ॥
पालनं पण्डितानां च पूर्वेषां ते परम्परा ।
ख्यातिस्ते जायतां लोके" पुष्यत्येषोऽपि पण्डितान्" ॥ १४ ॥
उत्सुकोऽ पि न शक्नोमि द्रष्टुं भोजसभामहम् ।
आश्रीयते मया तस्मात् अगत्या पत्र-साधनम् ॥ १५ ॥
कालिदासकवेः काव्यं पठितं यत्र सादरम् ।
तत्रैव पठितं मेऽपि स्वप्नोऽप्येष सुखावहः ॥ १६ ॥

+क्रतौ विवाहे व्यसने रिपुक्षये यशस्करे कर्मणि मित्रसंग्रहे ।
प्रियासु नारीषु च बान्धवेषु अतिव्ययो नास्ति नराधिपाष्टसु ॥

२१८ मंगळवार सातारा
माघ शुद्ध १ शके १८७१

दिगंबर महादेव कुलकर्णी

ಪುಸ್ತಕಿಕ ಸಂಖ್ಯೆ P 2515

KARNATAKA SA

विज्ञापनम्

अनेनैव ग्रन्थकर्त्रा रचितानि

★ १ विविधानि मार्मिकाणि सुभाषितानि

★ २ विनोदगर्भाः सुलभा नाट्यसंवादाः

★ ३ मनोहराणि प्रासंगिकानि पद्यानि च

पुस्तकरूपेण एकत्र अचिरादेव प्रकाशयिष्यन्ते । तेषां परिशीलनेन वाचकाः गीर्वाणवाण्यां पाटवं, बहुश्रुतत्वं, सुबोधं, मनोरंजनं च युगपत् सलीलं च प्राप्नुयुः । अतः संस्कृताभिमानिनः तत्पुस्तकं अवश्यं क्रीणीयुरिति प्रार्थना ।